आयुर्वेदीयग्रन्थमाला ।

अष्टमं नवमं च पुष्पम् ।

वैद्यवरश्रीकालिदासविरचिता

वैद्यमनोरमा ।

तथा

धाराकल्पः ।

संशोधकः ।

ब्रह्मश्री ते. नीलकण्ठशर्मा

तथा

आचार्योपाह्वत्रिविक्रमात्मजो यादवशर्मा

१७२, घोराबझार स्ट्रीट, फोर्ट मुंबई.

१९१२.

मूल्यं ८ आणकाः ।

आयुर्वेदीयग्रन्थमाला ।

अष्टमं नवमं च पुष्पम् ।

वैद्यवरश्रीकालिदासविरचिता

वैद्यमनोरमा ।

तथा

धाराकल्पः ।

संशोधकः ।

ब्रह्मश्री ते. नीलकण्ठशर्मा

तथा

आचार्योपाह्वत्रिविक्रमात्मजो यादवशर्मा

ÂYURVEDÎYA-GRANTHAMÂLÂ.

Nos. 8-9.

VAIDYA MANORAMÂ

BY

KÂLÎDÂS

AND

DHÂRÂKALPA.

EDITED BY

BRAHAMASHRÎ T. NÎLKANTH SHARMÂ.

AND

VAIDYA JÂDAVJÎ TRICUMJÎ ÂCHÂRYA,

372, Borâ Bazâr Street, Fort, Bombay.

1913.

मूल्यं ८ आणकाः ।

Price 8 annas.

Printed by R. Y. Shedge, at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay and Published by Vaidya Jâdavji Tricumji Âchârya, 372, Borâ Bazâr Street, Fort, Bombay.

भूमिका.

वैद्यमनोरमा इति प्रसिद्धोऽयं ग्रन्थो भिषग्वरकालिदासविरचितः। सोऽयं कालिदासः केरलदेशोत्पन्न इति ज्ञायते, वैद्यमनोरमायां केरलदेशे एव प्रसिद्धानां बहूनां भेषजद्रव्याणामुपादानात्। अस्मिन् ग्रन्थे विंशतिपटलेषु ज्वरादिरोगाणां चिकित्सा अन्यग्रन्थेषु प्रायोऽनुक्तैः स्वल्पायाससाध्यैर्भूरिगुणैर्दृष्टप्रत्ययैश्च प्रयोगैरुक्ता। ग्रन्थस्यास्यैकं पुस्तकं केरललिपिलिखितानेकपुस्तकान्यवलम्ब्य देवाक्षरैर्लिखित्वा मदीयपरमसुहृद्भिः त्रावन्कूर (Travancore) राष्ट्रान्तर्वर्तिव्याघ्रपुर(Vaikam)समीपस्थविन्यासपुरी (Vetchure) वास्तव्यैरायुर्वेदभिषग्भिः **ब्रह्मश्री ते.** (तेवलक्काट्ट मूस्सु) **नीलकण्ठशर्मभिः** प्रेषितम्। तैरेव बहुषु स्थलेषु टिपण्या सनाथीकृतं च। सेयं वैद्यमनोरमा मया भूयः संशोध्य आयुर्वेदीयग्रन्थमालायां प्रसिद्धिं नीता। ग्रन्थस्यास्य संशोधने यथामति कृतेऽपि यत्र भ्रमप्रमादादिवशाज्जातं स्खलनं क्वाप्युपलभ्येत चेद्गुणैकपक्षपातिभिः सुधीभिः संशोधनीयं क्षन्तव्यश्चाहमिति शम्।

यादवशर्मा.

धाराकल्पः।

अयं ग्रन्थोऽपि मदीयपरमसुहृद्भिः **ब्रह्मश्री ते. नीलकण्ठशर्मभिरेव** केरललिपिस्थप्राचीनपुस्तकमवलम्ब्य देवाक्षरैर्लिखित्वा प्रेषितः। एतद्ग्रन्थकर्तुर्नामादिकं न ज्ञायते। अस्मिन् ग्रन्थे धारापरिषेकविधिरतीव सरलतया विशदतया चोपवर्णितोऽस्ति। यद्यप्ययं विषयश्चरकसुश्रुतवाग्भटेषु स्वेदाध्याये उक्तस्तथाप्यत्र तदपेक्षयाऽपि सम्यक्तया कथितोऽस्ति। अतोऽयं ग्रन्थो लघुरपि भिषजामतीवोपादेयः। वैद्यमनोरमायाः धाराकल्पस्य च आयुर्वेदीयग्रन्थमालायां मुद्रापणार्थं दानेन बहूपकृतमस्या ग्रन्थमालायाः **ब्रह्मश्री ते. नीलकण्ठशर्मभिः**।

ज्येष्ठ शुक्र १५ }
संवत् १९६९ }

यादवशर्मा.

वैद्यमनोरमान्तर्गतविषयानुक्रमणिका ।

वैद्यमनोरमायाः पाठसंशोधनम् ।

अपपाठः	सुपाठः	पृ.	पं.
चर्म-	चर्म	३	३
दूर्वाम्भो	दूर्वाम्भो	४	१४
नाकुल्यः	नाकुल्याः	५	९
°वराड्योष°	°वराव्योष°	,,	२२
ब्राह्मीवासासिंहलीभिः कुण्डल्या मूलकेन च	ब्राह्मीवासाद्विसिंहालीकुण्डलीमूलकासहैः	६	१
अमृतालर्ककैः	अमृतालर्कके	,,	२
चिवाल्वगेका	चिवालगमी	,,	९
निःशृतमन्वहं	निःसृतमन्वहं	,,	२४
तु हीबेरकवारिणार्कं	त्रुटीवालकवारिणार्कं	७	,,
°लाक्षायतैल°	°लाक्षार्यं तैल°	८	८
°भवति	°भवन्ति	,,	१८
निहन्त्या°	निहन्त्या°	९	२
तल्युक्तमिह	तैलयुक्तमिह	१०	८
तथाऽहिफेनं	तैथाऽहिफेनं	११	२
°पैत्र°	°पत्र°	,,	३
दीप्यकस्तथा	दीप्यकं तथा	,,	५
सैत्पार्चिषा	ससंसार्चिषा	१२	२३
पेशिनीमपि	पेषिनीमपि	१३	४
श्वेतपर्णासमूलेन	श्वेतपूलासमूलेन	,,	१७
°त्तावां तद्विगुणे	°त्तस्यास्ताद्विगुणे	,,	२०
प्रतिवपेत्तद्दीपनं	प्रतिपचेत्तद्दीपनं	,,	२२
वक्षदक् पशु°	वक्षरुक्पशु°	,,	२५
महौषधं	महौषधैः	१४	६
गुह्यमेतच्चिकित्सतम्	गुह्यमेतच्चिकित्सितम्	१५	१६
घातकी°	धातकी°	१६	६
विनिर्मितो निष्कसमानपिण्डः	बीजत्वचा निर्मितनिष्कपिण्डः	,,	१९
°वल्कमेहार्यम्भोधि°	°वल्कलमेहारिबोधि°	,,	२३
°द्रज्ञाघराज्ञि°	°द्रज्ञाघराज्ञि°	१७	६
पुनस्तत्पयः	पुनस्तत्पयः-	१८	९

अपपाठः	सुपाठः	पृ.	पं.
अत्रकगन्धकतुर्थं°	गन्धकटङ्कनतुर्थं°	१८	१७
°मपहरति	°मपोहति	,,	१८
°विनिर्मितं ।	°विनिर्मितं	२०	५
वैद्यमनोरयायां	वैद्यमनोरमायां	२१	७
शोफ विसर्प°	शोफविसर्प°	,,	९
'चित्रब्दा'	'चित्राब्द'	,,	२४
गोमूत्रेण	गोमूत्रे वा	२२	१०
°गुडं	°गुडो	२३	५
पलाष्ठ°	पलाष्ठ°	,,	२२
सर्पत्वचां	सर्पत्वचं	२४	३
कर्पूरवल्याश्चूर्णं	कर्पूरवल्याश्चूर्णं	,,	२१
बहुशो°	बहुशो°	२५	१५
°गोजिह्वाप्रजो°	°गोजिह्वात्वप्रजो°	,,	,,
°भिवन्दये	°भिवादये	,,	२१
विपादिकायाः	विपादिकायां	२६	१४
कदूष्णमाश्रेव	कदुष्णमाश्रेव	३०	८
प्रवनो	पवनो	,,	,,
पिबेद्धर्मे°	पिबेद्धर्मे°	३२	४
पुष्पलतापत्रं	पुष्पलतापत्रं	३३	२४
चम	चर्म	३४	१
शतपत्रीरसो	धात्रीरसो	,,	१०
प्रथमर्णवानि	प्रथमं नवापि	३५	१६
°द्विपग°	°द्विपन°	३६	२
देहे तु कस्य च निरीक्षण°	भीहेतुकस्य विनिरीक्षण°	,,	२१
करबलत्वं	बलकरत्वं	३८	२
सुतापं	सुताप्यं	,,	२५
कतकतरुणा	कतकतरुणं	३९	२
प्राम°	प्रम°	४०	९
°घृताभ्या°	°घृताभ्या°	,,	१०
°व्रनाणशिनी	°व्रणनाशिनी	४१	१०
सलिलं तुन्नतरोर्विपाचितम्	सलिले तुन्नतरोर्विपाचिता	,,	१२
°क्षुच्छियुतं	°क्षुच्छिरतं	,,	१७
रिपदं भास्करम्	स्वयं भास्करः	४२	१८

अपपाठः	सुपाठः	पृ.	प.
स्नेहं	स्नेहं	४३	६
पिङ्गजम्	पिङ्गदम्	४४	२
विशालारस°	निशाख्यरस°	४५	३
जम्बीररसेन पिष्टं	जम्बीररसपिष्टं	,,	६
बकुलजटाभवकल्कः	बकुलजटाजिनकल्कः	४६	१९
शुष्किर्व्यांघ्रानखौ°	शुष्किर्व्याघ्रनखौ°	४८	२४
निक्षिपेत्स प्रणश्यति	निक्षिपेत्सर्वप्रणश्यति	४९	१०
तान्तवसंस्तुतम्	तान्तवसंयुतम्	,,	२४
कुहितनिष्पाव°	कुकुटनिष्पाव°	५१	२
°मिश्रमूत्रैः	°विश्वमूत्रैः	५२	१६
°क्षीरसेकं	°क्षीरसेकं	५४	१५
योनर्हरे°	योनेर्हरे°	५५	१०
कामुकगर्जितान्	कामुकगर्हितान्	,,	,,
यान्यं	नान्यं	५६	१८
वामाङ्गे	वामाङ्घ्री	५७	२३
तन्मन्त्री	तं मन्त्री	५८	१६
दन्तमुखेन	दन्तमखेन	५९	९
तमापिबे-	तमापिबेत्	६०	१७
नासिका°	नासिका°	,,	१८
शाल्मलितरौ	शाल्मलितरो	६२	७

१६ पृष्ठे १८ पद्यानन्तरमयं श्लोकोऽधिको ज्ञेयः—"पुष्पाश्वत्थस्य पञ्चाङ्गं चूर्णितं मधुना लिहेत् । जयेत् प्रमेहं कल्हारचूर्णं च मधुना तथा" इति ।

४२ पृष्ठे २२ पद्यानन्तरमयं सार्धश्लोकोऽधिकः पठनीयः—'रक्तोत्पलकरहाटकशिफा च शुक्रप्रसूनविषमुष्टेः । मूलं च पौत्रदीर्घं समाहृत्य तैर्विहिता ॥ दार्वीवासितकाञ्जिकपिष्टैर्गुटिका निहन्ति तिमिराणि' इति ॥

धाराकल्पपाठसंशोधनम् ।

°चिदेकविग्रहम्	°चिदेकविग्रहम्	१	४
°मात्रोत्तान°	°मन्त्रातान°	,,	१५
गच्छद्वारिर°	गच्छद्वर्तिर°	२	१०
शिरसिजान्	शिरसि वा	३	२३
°धाप्यत्र	°धाप्येऽत्र	४	७

आयुर्वेदीयग्रन्थमाला ।

श्रीकालिदासविरचिता

वैद्यमनोरमा ।

अथ ज्वरचिकित्साधिकारो नाम प्रथमः पटलः ।

वन्दे मन्दकणद्भृङ्गवृन्दानन्दकरं मदैः ।
हन्तारमन्तरायाणामिन्दुशेखरनन्दनम् ॥ १ ॥

इमां मनोरमां पाणौ गृहीत्वा रोगपीडितान् ।
चिकित्सयन्तो लोकेऽस्मिन् कीर्तिमन्तो भवन्ति हि ॥ २ ॥

सुलभसुभगभेषजानि सिद्धा-
न्यमृतसमानफलानि यानि यानि ।
सकलगदहराणि मानवाना-
मिह कथितानि भवन्ति तानि तानि ॥ ३ ॥

अत्यध्वश्रमशोकस्त्रीभयक्रोधादिजे ज्वरे ।
लङ्घनं न हितं तत्र पयः पथ्यं यथाऽमृतम् ॥ ४ ॥

दोषजासु बलं रक्षन् लङ्घयेज्जूर्तिषु क्रमात् ।
पेयाक्वाथरसाद्यैश्च पथ्यैः साध्याानुपक्रमेत् ॥ ५ ॥

शृतशीतं शृतोष्णं वा जलं दोषाद्यपेक्षया ।
पेयं षडङ्गसिद्धं[1] वा तप्तं वा भृष्टलोष्टकैः ॥ ६ ॥

---

१ "शुण्ठीमब्दजोशीरघनपर्पटवारिभिः । षडङ्ग इति विख्यातो योगोऽयं सूरिभिः स्मृतः ॥" ।

द्वितयैकांशधान्याकनागराभ्यां शृतं जलम् ।
पेयं प्रागपि सप्ताहाज्ज्वरितेनाग्निवृद्धये ॥ ७ ॥
पाठोशीरजलैः सिद्धः क्वाथः स्यात् पाचनं ज्वरे ।
नागराम्बुयवासैश्च पृथक् सिद्धः सपर्पटैः ॥ ८ ॥
अमृताकणमूलनागराणा-
ममृतानागरदुस्स्पृगम्बुदानाम् ।
अनिलज्वरनाशनौ कषायौ
कथितौ ह्यागमकोविदैर्भिषग्भिः ॥ ९ ॥
गोपाङ्गनाकमलचन्दनसेव्यमुस्ता-
यष्टीजलोत्पलमधूकशतावरीभिः ।
सिद्धं सुशीतमनु माक्षिकशर्कराढ्यं
पित्तज्वरं जयति दाहतृषाढ्यमम्बु ॥ १० ॥
पक्वेन दाडिमफलस्वरसेन वाऽपि
सक्तून् पिबेत् प्रबलपित्तभवज्वरार्तः ।
तद्वत् षडङ्गशृतमम्बु पिबेत् सिताढ्यं
तृड्दाहजूर्तिशमनाय च दीपनाय ॥ ११ ॥
पथ्याकट्फलनागराम्बुदवचाभूनिम्बधान्यद्रुमै-
र्भार्गीपर्पटकान्वितैः शृतमिदं तोयं सुशीतं पुनः ।
मध्वाढ्यं परमाणुरामठयुतं श्लेष्मज्वरं नाशयेत्
कोष्ठार्तिश्वसनाग्निसादकसनारुच्यास्यशोषान्वितम् ॥ १२ ॥
कूष्माण्डपुष्पस्वरसेन नस्यं सविश्वसारेण कृतं ज्वरघ्नम् ।
वातात्मजेनाहृतमौषधं तद्रामानुजस्येव नयेत्प्रबोधम् ॥१३॥
प्रलापमूर्च्छाभ्रमदाहयुक्ते तृषान्विते दोषसमूहजूर्तौ ।
पयोऽङ्गनानां पिबतां नराणां द्रागेव जूर्तिः प्रशमं प्रयाति ॥
सुनिषण्णवेणुपत्रशुण्ठीमुस्ताशृतः क्वाथः ।
हन्याज्ज्वरमतिवेगं दोषसमूहोद्भवं त्रिदिनात् ॥ १५ ॥

१ 'विश्व-'इति पाठान्तरम् ।

कल्कितामारनालेन स्वच्छन्दं रजनीं पिबेत् ।
नतु देशान्तरगतो बाध्यते शीतिकादिभिः ॥ १६ ॥
तुङ्गद्रुमस्य तरुणानि फलानि चर्म-
चत्वारि किञ्चिदपनीय जलस्य कुम्भे ।
पक्त्वा गते तदुदके निशि पीतमेकं
संसाधयेज्ज्वरमतीव चिरन्तनं द्राक् ॥ १७ ॥
पाठाशिफापयः पीतं प्रातरेव दिनैस्त्रिभिः ।
शीतिकां कम्पबहुलां नाशयेल्लशुनं तथा ॥ १८ ॥
बन्दाको बिल्वभवस्तक्रेण घृतेन वा प्रगे पीतः ।
विषमज्वरस्य विकृतिं जयेन्निःशेषमतिविषमाम् ॥ १९ ॥
जीवन्तीमूलनिर्यूहः सघृतो दाहजूर्तिजित् ।
तद्वन्न्यग्रोधपादस्य बदरीपल्लवस्य वा ॥ २० ॥
सहदेवीशिफा बद्धा श्वेतसूत्रेण कन्यया ।
निहन्ति दक्षिणे पाणौ ज्वरभूतग्रहादिकान् ॥ २१ ॥
चूर्णेन कटुरोहिण्याः पत्रैर्वा छिन्नरोहजैः ।
स्वरसैः सहदेव्या वा सिद्धं तैलं ज्वरं जयेत् ॥ २२ ॥
ज्वरेण मुच्यमानस्य म्रियमाणस्य चोभयोः ।
दृश्यन्ते यानि लिङ्गानि तानि तुल्यानि निर्दिशेत् ॥२३ ॥

इति श्रीवैद्यवरकालिदासविरचितायां वैद्यमनोरमायां ज्वराधिकारो नाम प्रथमः पटलः ।

अथ रक्तपित्तासृग्दरास्थिस्रावसोमरोगाधिकारो नाम द्वितीयः पटलः ।

मेघनादाभयापद्मकिञ्जल्कैः साधितं जलम् ।
सक्षौद्रं रक्तपित्तघ्नं बीजं वा वास्तुकोद्भवम् ॥ १ ॥

१ "आरनालं तु गोधूमैरामैः स्यान्निस्तुषीकृतैः । पक्वैर्वा सन्धितैस्तत्तु सौवीरसदृशं गुणैः" ॥

इक्षुदूर्वामृताधात्रीश्वदंष्ट्रास्वस्तिकोद्भवैः ।
स्वरसैर्नालिकेराम्बुपयोयुक्तैः सुकल्कितैः ॥ २ ॥
चातुर्जातपयोवृक्षमुकुलाम्बुपयोधरैः ।
सारिवोशीरयष्ट्याह्वसितोपलहिमामयैः ॥ ३ ॥
सिद्धं घृतं नवं तूर्णं रक्तपित्तहरं परम् ।
अस्थिस्रावं च नारीणां तृड्दाहौ च महाबलौ ॥ ४ ॥
उभयायनमप्याशु रक्तपित्तं हिताशिनाम् ।
हन्ति पित्तामयान् चान्यान् पाननावनलेपनैः ॥ ५ ॥
बहुप्रकारैरुपसेव्यमाना क्षौद्रान्विता रक्तजयाय वासा ।
सत्यं समर्था जगतां सवित्री यथैव संसारजयाय गौरी ॥६॥
तत्क्षणं क्षुण्णमाघ्रातं शुष्कगोमयमस्यति ।
नासास्रुतमसृक्स्रावं चन्दनस्योत्पलस्य वा ॥ ७ ॥
दाडिमकुसुमस्वरसः स्तन्यं वा चूतकुसुमसलिलं वा ।
दूर्वाम्भो वा नस्यान्नासारक्तस्रुतिं जयति ॥ ८ ॥
धात्र्यस्थि तण्डुलजलैः पीतं हन्यादसृग्दरम् ।
पीता शीताम्बुना पिष्टा धात्री वोन्दुम्बराम्बुना ॥ ९ ॥
जीर्णचेलभसितं पिबेद्वधूः पुष्पजातरुधिरेण पीडिता ।
तक्रतैलतरुणोष्णवारिभिः प्राप्तपुष्पसुभगा भविष्यति १०
उत्पलपत्रस्वरसः किञ्चित्तैलेन सहापीतः ।
अस्थिस्रावं स्त्रीणां नाशयति नरस्य सोमरोगं च ॥ ११ ॥
अनन्तया साक्षतया कृता तैलेन शष्कुली ।
अस्थिस्रावहरी तद्वत् कार्पासाक्षतजा च सा ॥ १२ ॥

१ "त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् । नागकेशरसंयुक्तं चातुर्जातकमुच्यते" ॥ २ "तिलजीरकसंयुक्तैः पिष्टैर्वा तण्डुलादिभिः । कृता तु हस्तयन्त्राभ्यां सुवृत्ता च तिलोद्भवे ॥ पात्रमण्डलसंकाशा शष्कुली सा प्रकीर्तिता" ॥

पूर्वं तोये वासरं वासितानां
चिञ्चास्थीनां दुग्धकल्कीकृतानाम् ।
पीत्वा स्यातां सुन्दरीपूरुषौ द्रा-
गस्थिस्रावात्सोमरोगाच्च मुक्तौ ॥ १३ ॥

इति वैद्यवरश्रीकालिदासविरचितायां वैद्यमनोरमायां रक्तपित्तासृग्दरा-
स्थिस्रावसोमरोगाधिकारो नाम द्वितीयः पटलः ।

अथ कासश्वासहिक्काधिकारो नाम तृतीयः पटलः ।

इन्द्रयवपल्लवयुतं मरिचं खादेद्दिनत्रितयम् ।
कासान् जयति समूलान् नाकुल्यः पादवल्कमिव ॥ १ ॥
पिप्पली पिप्पलीमूलं चित्रको हस्तिपिप्पली ।
सैन्धवं सयवक्षारं हिङ्गु सौवर्चलं तथा ॥ २ ॥
मरिचं नागरं चैव पलांशैस्तैर्विपाचयेत् ।
क्षीरे चतुर्गुणे सम्यक् सर्पिः सिद्धं पिबेन्नरः ॥ ३ ॥
शूलगुल्मोदरार्तिघ्नं हृद्रोगोरःक्षतापहम् ।
आनाहपाण्डुताप्लीहकासश्वासविकारनुत् ॥ ४ ॥
पिप्पल्याद्यमिदं सर्पिः पित्तगुल्महरं परम् ।
नैकुंखिके रसे पीतं सैन्धवं शूलशान्तये ॥ ५ ॥
त्रिकटुकमजमोदा चित्रको हिङ्गु भार्गी
विडमपि सह चव्यं सैन्धवं यावशूकम् ।
अमृतमिति भिषग्भिः पूजितश्चूर्णराजः
कफपवनहन्ता शूलहा दीपनश्च ॥ ६ ॥
अमृताविडङ्गरास्नादारुवराव्योपचूर्णसमतुलितम् ।
सहसा सर्वान् कासान् सितारजः परिहरेत्समधु ॥ ७ ॥

१ अयमर्धश्लोको न दृश्यते केषुचिद्धस्तलिखितपुस्तकेषु ।

ब्राह्मीवासासिंहलीभिः कुण्डल्या मूलकेन च।
अमृतालर्ककैः सर्पिः साधितं श्वासकासजित् ॥ ८ ॥
हिङ्गुवचाग्निमहौषधदीप्यकपथ्याकणात्रिवृताम्।
क्रमवृद्ध्या जनितरजः कासं श्वासं जयेत्सघृतम् ॥ ९ ॥
विदुलीदलहरितालव्योपशिलाः केशराजरसपिष्टाः।
गुटिकीकृत्वा निहन्युः कासरुजं धूमपानेन ॥ १० ॥
निर्गुण्डीकुण्डलीपथ्यामरिचैः सममागिकैः।
क्वाथो लवणसंयुक्तः कासश्वासविकारनुत् ॥ ११ ॥
चिञ्चात्वगेका द्विनिशा त्रिसर्जैकपुनर्नवा।
नवजातिदला वर्तिः कासजित् वाद्यधूपिता ॥ १२ ॥
शिलाकृष्णे समे स्यातां तस्यार्धं विश्वभेषजम्।
तस्यार्धं मरिचं चैव तस्यार्धा तु हरीतकी ॥ १३ ॥
भृङ्गसारेण संपिष्य वर्तिं कुर्यात् पटोदरे।
तया धूमं पिबेदार्तो भुक्त्वा ताम्बूलचर्वणम् ॥ १४ ॥
कृत्वा त्रिवारं मतिमान् कासश्वासान्निवर्तयेत्।
तथा क्षौद्रयुतं नूनं नवनीतं सितायुतम् ॥ १५ ॥
पलाशोदुम्बरफलं मरिचैः सह भक्षितम्।
कासं हरेत्त्रिभिर्वारैः कायक्लेशकरं निशि ॥ १६ ॥
श्वासायासविनाशार्थमाशयेत् कदलीफलम्।
शृतं मूत्रेऽथवा भृष्टमथवाऽङ्गारपाचितम् ॥ १७ ॥
कणोपणनिशापथ्यागुडगोस्तनिकारजः।
लीढं तैलेन कासानां श्वासानां च निवृत्तये ॥ १८ ॥
निर्गुण्डीस्वरसे शृतं तिलभवं भृङ्गादिचूर्णान्विते
पात्रे निःशृतमन्वहं दिनमुखे तन्मात्रया यः पिबेत्।

१ अयमर्धश्लोको न दृश्यते केषुचिद्धस्तलिखितपुस्तकेषु।

कासश्वासमशेषमग्नितनुतां शीघ्रं जयेन्मासतो
यक्ष्माणं च समस्तरोगनिलयं रामो यथा रावणम् ॥ १९॥
कुण्डल्युत्तमकन्यकामधुकरव्याघ्र्यर्कनिर्गुण्डिका-
कासघ्नीवृषकण्टकीदलरसे क्षीरे क्रमाद्भाविता।
कृष्णा क्षौद्रसमन्विता दिनमुखे लीढा जयेदुःस्थितं
कासश्वासमरोचकं क्षयमपि प्राज्ञो यथा किल्बिषम् ॥२०॥
परिणतकैडर्योच्छकलीकृत्वाऽऽज्यकुम्भपरिदग्धात्।
तैलं निःस्रुतमस्यति कासं श्वासं प्रमेहं च ॥ २१ ॥
काकोदुम्बरपल्लवं शकलितं दुग्धे गवां पाचितं
किञ्चिन्मिश्रितमागधं दिनमुखे पीत्वा पयस्तादृशम्।
कासश्वासमशेषमाशु शमयेद्राढप्रसूनान्वितं
क्षीरं तद्वदिदं द्वयं च भिषजां कीर्तिप्रदं कीर्तितम् ॥ २२ ॥
मधुकररसकंसे माणिमन्थाष्टबिल्वं
मरिचतिलजशुण्ठीसर्पिषामञ्जलिर्द्वे।
शुभतरदिनलग्ने साधु संयोज्य पक्वं
श्वसनकसनशान्त्यै भक्षयेद्भोजनेन ॥ २३ ॥
साध्ये श्वासे दोषकालाग्निसत्त्वान्
सम्यग्वीक्ष्य प्रातरेव प्रपीतम्।
कृष्णाशुण्ठीसैन्धवक्षौद्रयुक्तं
रोहूच्छिष्टोद्भूतसारं प्रशस्तम् ॥ २४ ॥
शुण्ठीकणासिताधात्रीरेणुः क्षौद्रेण मिश्रितः।
हिक्कां हन्ति समालीढः, सक्षौद्रं पिच्छभस्म वा ॥ २५ ॥
कपित्थपत्राणि विमर्दितानि हिक्कासु जिघ्रेदथवाऽङ्कितप्तम्।
मृत्पिण्डमत्यन्तसुशीततोयैः सिक्तं तु ह्रीबेरकवारिणाक्तम् ॥

१ राहूच्छिष्टं लशुनं, तस्य स्वरस इत्यर्थः। २ मयूरपिच्छभस्मेत्यर्थः।

हिक्कायामतिवृद्धायां भ्रुवोर्मध्ये निषेचयेत् ।
शीतलेनाम्बुना स्नानं धूमं वा गुग्गुलोः पिबेत् ॥ २७ ॥

इति वैद्यवरश्रीकालिदासविरचितायां वैद्यमनोरमायां कासश्वासहिक्काधिकारो नाम तृतीयः पटलः ॥ ३ ॥

अथारोचकशूलच्छर्दितृष्णाधिकारो नाम चतुर्थः पटलः ।

आजं मांसरसक्षीरं गण्डीरं शोषिणां हितम् ।
अश्वगन्धादिलाक्षाद्यतैलमभ्यञ्जने हितम् ॥ १ ॥
अश्वगन्धारजो लिह्याद्गुडेन हविषाऽथवा ।
पयसा वा पिबेच्छ्लक्ष्णक्षतक्षीणो रसायनम् ॥ २ ॥
गुडेन पिप्पलीभिर्वा मरिचेनान्विता शृता ।
काकमाची भवेद्बल्या तद्रसेन हविः शृतम् ॥ ३ ॥
पक्वत्वा संस्कारसंभृष्टो बृहतीफलसंचयः ।
दध्नि प्रक्वथिते पश्चात् क्षिप्तः पथ्योऽप्यरोचके ॥ ४ ॥
प्रसेकशमनी पथ्या भुक्तस्योपरि चर्विता ।
प्राग्भक्तं निम्बकुसुमं पटोलीं शरसीं च वा ॥ ५ ॥
द्रोणीत्वङ्नागकुसुमगुडशुण्ठ्यः क्रमाधिकाः ।
प्रसेकशूलक्रिमिमानग्रावान्नश्यति तत्क्षणात् ॥ ६ ॥
प्रयान्ति तद्भक्षयतां प्रभाते कुबेरनेत्राभिनवं प्रवालम् ।
नृणां शमं छर्द्यरुचिप्रसेकाः ससैन्धवं नागररामठं वा ॥७॥
किञ्चिद्दग्ध्वा मृत्तिकां ग्रीष्मतप्तैः[1] शीते तोये मर्दयित्वा प्रसाद्य ।
शीते क्षौद्रं तुल्यमालोड्य पीत्वा तृष्णां छर्दिं चाशु तन्यकरोति॥
मुद्गविदलैर्विपक्वैः केरीक्षीरेण[2] भक्षितैर्बहुशः ।
छर्दिर्नश्यति सहसा तयोस्तुल्याम्बुभिः पीतैः ॥ ९ ॥

---

१ अयमर्धश्लोकोऽधिको दृग्गोचरी भवति केषुचिद्धस्तलिखितपुस्तकेषु । २ 'ग्रीष्मतप्तां' इति पाठान्तरम् । ३ नारिकेलक्षीरेणेत्यर्थः ।

एलालवङ्गवल्कलतमालदलजं रजो मधुविमिश्रम् ।
लीढं वमिं निहन्त्याद्भिल्लवरांग्योपचूर्णं वा ॥ १० ॥
दग्ध्वा वराटिकागेहमङ्गाराभं तदम्भसि ।
निर्वापितं ततः पीतं तज्जलं नाशयेद्वमिम् ॥ ११ ॥
अतीव भृष्टं लवणं तिलोत्थे प्रक्षिप्य तेनोत्थितमाशु तैलम् ।
आदाय लिप्त्वा हृदये तदूर्ध्वं गुञ्जादलान्यर्पय हृद्गदघ्नम् ॥१२
स्तनयोरपि मूले च रुग्भवेद्यदि वेगिनी ।
निशाशम्बूकसहितचूर्णलेपो जयेद्रुजम् ॥ १३ ॥
न्यग्रोधशुङ्गोत्पलकन्दकोलमाषैः शृतं तोयमतीव शीतम् ।
क्षौद्रान्वितं पीतमपाकरोति तृष्णां च पर्याप्तमतीव शीघ्रम् ॥
आर्द्रपूगफलचर्वणोत्सुकं स्वेन वल्कशकलेन चर्वयेत् ।
तन्मदं हरति तत्तथाकृतं स्वाभिमानमिव वेदविश्रुतः ॥१५
ताम्बूले सति भक्षिते भवति चेत्कासान्वितं विस्वरं
निष्ठीवेन सहैव तच्छिशिरमम्ब्वाघ्राय शीघ्रं पिबेत् ।
आहोस्विद्विवृतास्यवान् पवनमाश्वेवोद्गिरन्नासिकां
रुद्ध्वा पार्श्वगतो जनः प्रबलहृत्क्षोभं न कुर्याद्द्रुतम् ॥ १६ ॥
पित्तहृत्कम्पतृण्मूर्च्छाभ्रमादीन् घ्नन्ति दारुणान् ।
नालिकेराम्बुना पीताः सक्तवः समशर्कराः ।

इति वैद्यवरश्रीकालिदासविरचितायां वैद्यमनोरमायामरोचकशूलच्छर्दितृष्णाधिकारो नाम चतुर्थः पटलः ।

अथार्शोदावर्ताधिकारो नाम पञ्चमः पटलः ।

सितासिताविश्वभवौ चूर्णौ पथ्यारजः[1]समौ ।
गुडावलीढौ गुदजान् हतः श्लेष्ममरुद्भवान् ॥ १ ॥

---

१ "पथ्याबिभीतधात्रीणां फलैः स्यात्त्रिफला समैः । फलत्रिकं च त्रिफला सा वरा च प्रकीर्तिता" ॥

मासमेकमनन्नाशी सूरणं भक्षयेत्सुखम् ।
तक्रानुपानमार्शोनिर्मूलोन्मूलनोत्सुकः ॥ २ ॥
स्विन्नं निष्पीडितं स्नुह्याः पत्रं पायौ निधापयेत् ।
दुर्नामकृमिकण्डूतिशोफरुक्शान्तिकृत् परम् ॥ ३ ॥
किंशुकबीजपरागैर्लशुनपुनर्भूप्रवालसंयुक्तैः ।
पोट्टलिका तिलजाक्ता स्वेदादर्शांसि नाशयति ॥ ४ ॥
कालशाकमरिचाम्लसैन्धवैर्भृष्टषष्टिकहितोष्णभोजनम् ।
तलयुक्तमिह कीलनाशनं रुच्यमग्निजननं सरं परम् ॥ ५ ॥
हठस्य कैडर्यदलस्य चापि रजः सुसूक्ष्मं मधुनाऽवलीढम् ।
गुदाङ्कुरोन्मूलविनाशनाय पर्याप्तमित्याह भिषग्वरिष्ठः ॥ ६ ॥
पथ्यारसोनयोर्भागं निष्कं, द्वौ वज्रवल्लिजौ ।
ईषल्लवणतैलाक्तमेतदर्शांसि नाशयेत् ॥ ७ ॥
मयूरवल्ककिञ्जल्कवरीवासाशृतं जलम् ।
रक्तार्शसां प्रशमनं स्यात्पलाण्डुरिवाशितः ॥ ८ ॥
अभयात्रिवृत्कुलत्थैः शृतमुदकं पिप्पलीरजोयुक्तम् ।
चित्रातैलविमिश्रं पीतमुदावर्तमस्यति त्रिदिनात् ॥ ९ ॥

इति वैद्यवरश्रीकालिदासविरचितायां वैद्यमनोरमायामर्शोदावर्ताधिकारो नाम पञ्चमः पटलः ।

अथातिसारग्रहणीविषूचिकाधिकारो नाम षष्ठः पटलः ।

पाठानागरदुःस्पृग्बिल्वाग्निघ्नपाब्दसंशृतः क्वाथः ।
आमातिसारमस्येत् स्रावं सकफं सशूलं च ॥ १ ॥
पल्लवं चविकायाश्च श्वेतमूलाहसंभवम् ।
पल्लवं क्षीरिवृक्षस्य पिष्ट्वा तैलेन पाययेत् ॥ २ ॥

सर्वातिसारान् सहसा जयेदन्यैः किमौषधैः ।
तथाऽहिफेनं सक्षौद्रं तुल्यकारस्करत्वचम् ॥ ३ ॥
ऐरावतीपत्रसुशल्लकानि क्षुण्णानि निष्पीड्य रसः प्रपीतः ।
बलासरक्तं प्रबलातिसारं विनाशयेद्द्वित्रिदिनप्रयोगात् ॥ ४ ॥
चिञ्चाबीजत्वचं विश्वं सैन्धवं दीप्यकस्तथा ।
पिबेदामेन तक्रेण सोऽतिसारं जयेत्क्षणात् ॥ ५ ॥
यक्षलोचनमज्जानं काञ्जिकेन पिबेत्प्रगे ।
स श्लेष्मरक्तातीसारं कोष्ठशूलं जयेद्द्रुतम् ॥ ६ ॥
रसो निहन्त्यतीसारमाम्रत्वक्पुटपाकजः ।
तैलेन युक्तो रक्ताढ्यं सबलासं सनिःस्रवम् ॥ ७ ॥
बदरीपल्लवरसं पिबेद्रक्तातिसारवान् ।
शुण्ठीकदम्बत्वक्क्वाथं पिबेद्रात्रौ दिनत्रयम् ॥ ८ ॥
मुस्तां संक्षुद्य शुद्धां समपयसि दृढं मर्दयित्वा सुपूतां
पक्त्वा पादावशिष्टां मृदुतरशिखिना शीतलीकृत्य पश्चात् ।
लीढ्वा क्षौद्रान्वितां तां जयति सकफं रक्तयुक्तातिसारं
विष्णोः पूजेव सद्यः शमयति दुरितं पूर्वजन्मार्जितं तु ॥ ९ ॥
जम्बूक्षीरीवृक्षारलुककुभकरञ्जपल्लवस्वरसम् ।
लकुचफलस्वरसपलं छागं पयः पलमपि प्रगे पीत्वा ॥१०॥
जयति सरक्तश्लेष्मं प्रवाहणं गुदेषु जातं च ॥ ११ ॥
पूर्वेद्युरानीतसुरक्षितं जलं प्रभातकाले प्रपिबेत् सतैलम् ।
चिरन्तनं द्राक् शमयेत् सुघोरं प्रवाहणं रक्तकफान्वितं तु १२
आजे पयसि पाकान्ते पथ्याचूर्णं क्षिपेत् पुनः ।
दधि जातं पिबेत् प्रातस्तत्प्रवाहणपीडितः ॥ १३ ॥

---

१ अर्धश्लोकोऽयं नोपलभ्यते केषुचिदस्तलिखितपुस्तकेषु । २ 'जबलसं' इति पाठान्तरम् ।

तथा पक्वान्नवाष्पेन स्विन्ना तेनैव भक्षिता ।
सरक्तां विम्बिसीं हन्यात् सतैला क्षुद्रदुग्धिका ॥ १४ ॥
माणिमन्थमरिचाभयाजटा यक्षनेत्रसमभागसंमिताः ।
तक्रतैलघृतमात्रयाऽन्विता नाशयन्ति सहसा प्रवाहणम्१५
कृष्णाशुण्ठीशमीवीरतरूणां पत्रकल्पितैः ।
विलेप्यपूपकल्कैश्च सतैलैः शोणितं जयेत् ॥ १६ ॥
केदारसीमोद्भवमूषिकस्य मांसं गतान्त्रं पयसा प्रपिष्टा ।
तैलं पचेत्तद्विधिना प्रलिम्पेत् पिबेद्गुदभ्रंशविनाशनाय १७
गोकर्णत्वक्कुस्तानमस्करीधातकीकुटजसिद्धम् ।
ज्वरातिसारं जयति जलं चतुःपञ्चैर्दिवसैः ॥ १८ ॥
पयः प्रस्थे सम्यक्कृतमुदकमासिच्य जलदान्
शतद्वन्द्वान् क्षुण्णानपि सपदि निक्षिप्य विपचेत् ।
पयः शिष्टे त्यक्त्वा जलदशकलानि प्रतिवपे-
दुदश्वित्तज्जातं दधि जठररोगानपनयेत् ॥ १९ ॥
तदाथोऽस्मिन् दुःस्पृक्शृतमुदकमासिच्य शनकै-
र्मथित्वा तत्स्नेहं मथितमपि पथ्यौषधयुतम् ।
सदा पाने चान्ने करचरणयोर्योजितमिद-
मतीसारं हन्यादपि बहुविधाकारमचिरात् ॥ २० ॥
तक्रद्रोणे सशुक्ते लवणदशपलैर्विश्वपथ्यासमांशै-
श्चत्वारिंशत्प्रकुञ्चं घृततिलजपलान्यष्ट संयोज्य पश्चात् ।
पक्त्वा पाकेऽष्टचूर्णात्त्रिपलमपि समायोज्य धान्ये स्थितं तत्
खादेदग्नेः प्रदीप्तिं जनयति जयति प्लीहगुल्मोदरादीन्॥२१॥
पुराणशाल्यभावे तु शालीन् सेत्पार्धिपा सह ।
पचेदोपधिभिर्वाऽन्यैर्लघिमानं भजन्ति ते ॥ २२ ॥

१ "ऊषणत्रयसिन्धूत्थैः साजमोदद्विजीरकैः । हिङ्गुतुल्यैरेभिराहुरष्टचूर्णं मनीषिणः ॥" २ चित्रकेणेत्यर्थः ।

अविरुद्धोपदंशेन पक्वमद्येन मात्रया ।
भक्षितं मरिचं पूर्वं भृष्टं दुर्जरतां जयेत् ॥ २३ ॥
कालशाकविजयामहौषधैः साधितं रसयुगाक्षिभागशः ।
वारि वारयति शूलतृड्ज्वरान् पेशिनीमपि विषूचिकां क्रमात् ॥
तण्डुलोदकपिष्टेन तालमूलेन लेपनम् ।
नाभौ प्रकल्पितं सद्यो जयत्येव विषूचिकाम् ॥ २५ ॥
आमे विदग्धे विष्टब्धे विषूच्यां च वमेद्द्रुतम् ।
अशक्तश्चेत्पिबेत् कोष्णसलिलैः सर्पगन्धिकाम् ॥ २६ ॥
माणिमन्थजीरकाजमोदमागधौषधै-
र्वर्धितैः क्रमेण तैः समं हरीतकीरजः ।
पाचनं विरेचनं प्रदीपनं प्ररोचनं
पायुकीलनाशनं हुताशनाह्वयं तु तत् ॥ २७ ॥
निष्कं पौनर्नवं पत्रं तस्यार्धं स्यात् सिकासिका (?) ।
सिन्धूत्थं रक्तलशुनं शुण्ठीं हरितमञ्जरीम्॥ २८ ॥
मरिचांश्च पृथक् पादान् चूर्णमेतत्तु मस्तुना ।
पिष्ट्वा प्राग्भक्तमश्नीयादिच्छन् वह्नेर्बलं महत् ॥ २९ ॥
श्वेतपर्णासमूलेन सविश्वेन शृतं जलम् ।
अजीर्णं शमयेच्चूर्णं कर्णः कार्श्यमिवार्थिनाम् ॥ ३० ॥
यक्षाक्ष्यास्तरुणाग्रकाण्डमणुशश्छित्वा जले पाचये-
त्तासां तद्द्विगुणे तदम्भसि गते प्रस्थेन युक्तं पटोः ।
दुग्धप्रस्थमजस्य तेन विपचेत्तस्मिन् रसोनोषणं
तैलाज्यं च पलद्वयं प्रतिवपेत्तद्दीपनं स्यात्परम् ॥ ३१ ॥
अलर्ककुसुमाञ्जलिर्लशुनाग्निकासैन्धवात्
पलाष्टकमथोपणैलपुनर्नवाह्वं पलम् ।
यक्षदृक् पशुरसनापिचुयुतं च विश्वं तथा
तैलघृतपट्पलं पयसि पाचितं मान्द्यहृत् ॥३२ ॥

परर्मूरुपूगतैलपेपिता पृथगाद्यैरपि चूर्णितैः सह ।
परिलोड्य पिबेत्तु मात्रया दिवसादौ प्रबलाग्निमान् भवेत् ।
किमु कुष्ठभगन्दरानिलैरपि बाधा न भवेत्सुनिश्चितम् ॥ ३३ ॥
कालशाकविजयामहौषधैः साधितं जलमजीर्णनाशनम् ।
पुण्डरीकनयनाङ्घ्रिपङ्कजक्षालनोदकमिवाशु किल्बिषम् ॥ ३४ ॥
अर्धावशिष्टं जलमाढकार्धं महौषधं केवलमेव पीतम् ।
प्रदीपयेज्जाठरपावकं द्राक् तद्दीप्तिकृद्भिः किमुतान्यभेषजैः ॥
पर्युषितान्नं भुक्त्वा माहिषदध्ना तु शीतलाम्बु पिबेत् ।
अत्यग्निं जयति नरो लक्ष्मीरसंसिद्धमन्नं वा ॥ ३६ ॥

इति वैद्यवरश्रीकाळिदासविरचितायां वैद्यमनोरमायां अग्निमान्द्यग्रहणी-
विषूचिकाधिकारो नाम षष्ठः पटलः ।

अथ मूत्रकृच्छ्रप्रमेहसोमरोगाधिकारो नाम सप्तमः पटलः ।

चिरजलधरभाण्डोद्धृतपङ्कं गृहीत्वा
जठरवृषणनाभौ निक्षिपेन्मूत्रकृच्छ्री ।
तपनकिरणतापोद्धृतमूत्रोष्णवाते-
ऽप्यतिहिमसिकतानां राशिमत्र प्रदद्यात् ॥ १ ॥
यष्ट्याह्वैलोर्वारुबीजेक्षुकाण्डैः
शीतः क्वाथो नालिकेराम्बुजन्मा ।
पैत्तं कृच्छ्रं दाहतृष्णोष्णवातं
रक्तस्रावं मूत्रसादं हिनस्ति ॥ २ ॥
स्थलशृङ्गाटफलैर्वा कल्कः केरीफलाम्बुना पीतः ।
कृच्छ्रं मूत्रस्य जयेत्क्लेशमिवैशो नमस्कारः ॥ ३ ॥
मूत्रकृच्छ्रं जयेत् पीता क्षीरेण शिखरीशिफा ।
अजाक्षीरेण संपेष्य पीता नीलीजटा तथा ॥ ४ ॥

१ ऊरुपूगतैलं एरण्डतैलम् । २ रजनी: केरळेषु 'तिरुताळी' इति प्रसिद्धा ।

केतकीस्वरसे सिद्धं तत्प्ररोहाग्रकल्कितम् ।
सर्पिः पीतं दिनस्यादौ मूत्रकृच्छ्रं जयेद्द्रुतम् ॥ ५ ॥
जलेन नालिकेरस्य पिबेत् प्रातः प्रसारणीम् ।
मूत्रकृच्छ्रविनाशाय शर्करापातनाय च ॥ ६ ॥
प्रभाते पयसा पीतं क्षुद्रपप्फणपल्लवम् ।
मूत्रकृच्छ्रं जयेद्यद्वत् पापं भारतकीर्तनम् ॥ ७ ॥
पुष्पदलस्य स्वरसः सशर्करः प्रातरेव परिपीतः ।
कृच्छ्रं मूत्रस्य जयेत्स्रावमसह्यं च सहसैव ॥ ८ ॥
क्षुद्रकरवन्द(मर्द)मूलं पयसा पीतं प्रभातकालेषु ।
निरुणद्धि मूत्रकृच्छ्रं संतमसं भानुबिम्बमिव ॥ ९ ॥
ज्वरेषु मूत्रकृच्छ्रं चेत् कुमारीस्वरसं पिबेत् ।
कनीयः पञ्चमूलं वा गुह्यमेतच्चिकित्सितम् ॥ १० ॥
क्वाथो वरुणमूलस्य तत्कल्केन समन्वितः ।
पीतो निपातयेत्सद्यः शर्करामश्मरीमपि ॥ ११ ॥
यूथीमूलकुलत्थाभ्यां शृतः क्वाथो जयत्यलम् ।
शर्करां मूत्रकृच्छ्रं च गुह्यमेतच्चिकित्सितम् ॥ १२ ॥
नाभेरधस्ताद्धान्याम्लसेको जयति निश्चितम् ।
मूत्रकृच्छ्रं, शरीरेषु सेकस्तेनाङ्गदाहहा ॥ १३ ॥
चम्पकशिफाकषायः पीतो निरुणद्धि मूत्रमवशगतम् ।
नीचतलपतितमम्भश्चतुरजनोत्पादितो यथा सेतुः ॥ १४ ॥
प्रातरेव रजनी सुभक्षिता मेहविंशतिविनाशिनी ध्रुवम् ।
आँकुलीमुकुलपादसंयुता किं पुनर्मधुमती सुचूर्णिता ॥ १५ ॥

१ 'पप्फणः' केरळदेशे 'पावुट' इति प्रसिद्ध ओषधिविशेषः । २ पुष्पदलस्य कुष्माण्डदलस्य । ३ शालिपर्णी पृश्निपर्णी बृहती कण्टकारिका । गोक्षुरः पञ्चभिरेतैः पञ्चमूलमिदं लघु ॥ ४ आकुली: केरळभाषायां 'आवीरं' इति प्रसिद्धा वनस्पतिः ।

अश्वत्थबीजं हरिणस्य शृङ्गं तक्रेण पीतं मधुना सहैव ।
प्रमेहजातं सकलं निहन्ति दशाननं दाशरथिर्यथैव ॥ १६ ॥
पुष्पबोधिजलवैरिशाकिनीनग्नजिज्जनितबीजमम्बुदम् ।
भूसरीसृपयुतं सुचूर्णितं मेहविंशतिहरं क्षुदश्विता ॥ १७ ॥
कृष्णारिमेदपूलास(?)जम्बूदुम्बरकिंशुकम् ।
धातकीलोध्रविदुलमेषशृङ्गचब्धिकोठकाः ॥ १८ ॥
आकुल्यश्वाङ्घ्रिपङ्कानि पाठा रात्रिश्च चूर्णितम् ।
मधुना मात्रया लीढं प्रमेहान्ना शयेद्द्रुतम् ॥ १९ ॥
ग्राहात् गजेन्द्रो विष्णोर्वै प्रसादेन यथा तथा ।
तद्वत् क्षौद्रान्विता दार्वी प्रा(पी)तश्चामलकीरसः ॥ २० ॥
सागराङ्कोलपूलासवेणुपत्रशृतं जलम् ।
रात्रौ पिबेत् प्रमेहाणां प्रणाशायात्मवान् नरः ॥ २१ ॥
आकुलीनलदकिंकिस(?)बीजोद्भूतचूर्णमथ तक्रमधुभ्याम् ।
पीतमाशु मधुमेहनिहन्तृ किं पुनः कफसमुद्भवमेहान् ॥२२॥
निशाद्वयारग्वधकिंशुकैश्च कैडर्यजम्बूकतकारिमेदैः ।
वराब्धिकोठैः शृतमम्बु शीतं क्षौद्रान्वितं मेहगणं निहन्यात्२३
नन्द्यावर्तदलैः पिष्टैरीपचण्डुलसंयुतैः ।
तैले विपाचितोऽपूपो मेहविंशतिनाशनः ॥ २४ ॥
उदुम्बरक्षीरसुपिष्टचिञ्चाविनिर्मितो निष्कसमानपिण्डः ।
सशुक्रगुञ्जामधुतक्रपीतः प्रमेहमातङ्गविनाशसिंहः ॥ २५ ॥
यस्य यस्य प्रमेहस्य शमनं प्राशयेद्भिषक् ।
तस्य तस्य जलात्कल्कस्तं तं मेहं निरस्यति ॥ २६ ॥
कमलरजश्चिञ्चाफलवल्कमेहार्यम्भोधिबीजानाम् ।
द्विगुणयथोत्तरमानं चूर्णं मेहापहं समधु ॥ २७ ॥

१ पुष्पबोधिः अर्कः, जलं हीबेरं, वैरि 'एकनायकं' इति केरलेषु प्रसिद्धं, शाकिनी 'चीर' इति केरलेषु, नग्नजित् निघण्टुषु मृग्या । २ अब्धिकोठकः 'समुद्रफेन' इति प्रसिद्धः । ३ सागरा 'समुद्रप्पच' इति केरलेषु प्रसिद्धा ।

अष्टाभिर्वासरैर्वारिवासितैर्व्रीहिभिः कृतान् ।
पृथुकान् भक्षयेत् सायं सद्यो मेहनिवृत्तये ॥ २८ ॥
अङ्कोलाम्लाश्वकर्णामलकमुनितरुक्षीरिवृक्षप्रियङ्गु-
जम्बूकालारिमेदत्वचलुलितजले साधितं तैलमेतत् ।
तद्गुञ्जाबिल्वमुञ्जातकरजनियुक्तकल्कितं मेहजालं
हन्याद्ब्रह्मघराङ्घ्रिस्मरणमिव महापातकं सद्य एव ॥२९॥
सुपक्वकृष्णकदलीफलं भक्षयतां नृणाम् ।
न भवेत्सोमरोगश्च मूत्रकृच्छ्रं च पित्तजम् ॥ ३० ॥

इति श्रीकालिदासवैद्यविरचितायां वैद्यमनोरमायां मूत्रकृच्छ्रप्रमेह-
सोमरोगाधिकारो नाम सप्तमः पटलः ।

अथ विद्रधिशूलाधिकारो नामाष्टमः पटलः ।

करञ्जबीजविश्वोग्राः करञ्जक्वाथपेषिताः ।
पीताः प्रभाते निःशेषं घ्नन्त्याभ्यन्तरविद्रधिम् ॥ १ ॥
करञ्जास्थीनि संपेष्य वितुषीकृत्य चूर्णयेत् ।
स्नुग्दलस्वरसेनैव मृदित्वा रविसन्निधौ ॥ २ ॥
तैलं गृहीत्वा तत्तैलं बाह्यान्तरुपयोजयेत् ।
अन्तर्विद्रधिमाश्वेव नाशयेद्बाह्यजं तथा ॥ ३ ॥
आरया श्रवसि रन्ध्रमाचरेदन्यपार्श्वमवलोक्य बुद्धिमान् ।
अन्त्रवृद्धिशमनाय किंशुकत्वककषायमपि पाययेच्छिशुम् ॥ ४ ॥
सैन्धवेन्द्रलतापत्रं यक्षदृग्बीजपष्फणम् ।
तक्रेण पीतं सहसा वृद्धिं शूलं च नाशयेत् ॥ ५ ॥
ऊषणेन्द्रलताशुण्ठीरसोनैरण्डजं तथा ।
तुङ्गतैलविलिप्तेन रविपत्रेण बन्धनम् ॥ ६ ॥
अन्त्रवृद्धिजनितं विनाशयेच्छूलमिन्द्रयवपत्रजो रसः ।
तैलमिन्दुसहितं यथा तथा काममीशनयनाशुशुक्षणिः ॥७॥

पीतबर्बरनिर्यासः पीतो वृद्धिं विनाशयेत् ।
वृद्धिनं पीतदारूणां कल्कं मूत्रेण पाययेत् ॥ ८ ॥
क्षुद्रकरवन्दवरुणानलसुवर्ण
दुग्धसहितं पिबति यो जयति शूलम् ।
अश्वजनितं लशुननागरकुबेरा-
क्षीन्द्रलतिकाशृतजलं च निशि पीतम् ॥ ९ ॥
वर्षाभूकणमूलवह्निचविकाव्योपोत्तमानां रजः
प्रत्येकं कुडवं भवेदथ पटोः स्यात्कुण्डलीपल्लवात् ।
प्रातश्छागजलान्वितं च सहितं पक्वं पुनस्तत्पयः
कंसाभ्यां च समस्तगुल्महरणं स्यादब्धिहिङ्ग्वन्वितम् ॥ १०
सैन्धवामलकरजोनवनीतगुटीर्जयेत् ।
पित्तगुल्मविकाराणां दोषाणां संहतिं भृशम् ॥ ११ ॥
पिण्याकसैन्धवपुनर्नवचूर्णभास्व-
त्साराजमूत्रपयसां समभागभाजाम् ।
हिङ्गूपणाज्यसहिता गुटिकाऽग्नितप्ता
गुल्मोदराग्निसदनारुचिशूलहन्त्री ॥ १२ ॥
अभ्रकगन्धकतुल्यैरूषणकान्तयुतैः कृतचूर्णम् ।
पाचनदीपनरोचनमेतद्गुल्मविकारमपहरति सद्यः ॥ १३ ॥
षष्टिकं छागमूत्रेण द्विगुणेन पचेत्ततः ।
गृहीतान् तण्डुलाञ्जग्ध्वा गुल्मी छागपयः पिबेत् ॥ १४ ॥
वैश्वानरं तिलजगोघृतदुग्धभक्ता-
न्यस्मिन् पचेन्मृगदृशां करलालिताङ्गम् ।
तद्देशसंभवमतीव च नीलधूपं
गोसर्पिषा सह पिबेत्कफवातगुल्मी ॥ १५ ॥
यवक्षदग्विश्वलशुनैर्वैदद्दगृतुभागिकैः ।
क्वाथो गुल्मोदरानाहशूलोदावर्तवृद्धिहा ॥ १६ ॥

गुल्मशमनाय न स्याद्भेषजमत्र रससलिलादृते सहसा ।
वृक्षाम्लस्य स्वरसः सैन्धवयुक्तस्तथैव नियतं स्यात् ॥ १७ ॥
सैन्धवपादेन युतं नागरचूर्णं सहौदनं घृतं चापि ।
भुञ्जानः पञ्चदिनं प्रहरति गुल्मं क्षणेनैव ॥ १८ ॥
कालशाकलवणौषधान्वितं भक्तपक्वमथ सर्पिषाऽन्वितम् ।
मूलमत्ति पुनर्नवोद्भवं गुल्मतोदमचिरेण निश्चितम् ॥ १९ ॥
सैन्धवं स्नुहिमध्यस्थं दग्धमङ्गारवह्निना ।
सलिलेन कवोष्णेन पिबेच्छूलनिपीडितः ॥ २० ॥
नागरशोभाजनयोः क्वाथः शूलं विनाशयेत्रिदिनात् ।
मुनितरुवल्ककाथस्तद्वत् पटुरामठप्रतीवापः ॥ २१ ॥
केवलानिलसमुत्थे शूले महति प्रलेपयेन्मतिमान् ।
तुङ्गद्रुमतरुणजले रसोनकल्कं वयो बलं वीक्ष्य ॥ २२ ॥
शूलं तदाशु शमयेद्विण्मूत्रे च्यावयेन्नियतम् ।
स्तन्यनिघृष्टं मरिचं नसि निहितं नाशयेच्छूलम् ॥ २३ ॥
गुडमरिचविहितकल्कः कोष्णजलैः पीत आशु नाशयति ।

इति श्रीकालिदासवैद्यविरचितायां वैद्यमनोरमायां
विद्रधिगुल्मशूलाधिकारो नामाष्टमः पटलः ।

अथोदरपाण्डुचिकित्साधिकारो नाम नवमः पटलः ।

दुग्धे स्नुक्क्षीरपक्के दधिजनितमहोरात्रतस्तन्मथित्वा
सारं हृत्वा पिबेत्तन्मथितमुदररोगी विरेकाय मर्त्यः ।
तत्सर्पिर्दुग्धमूत्रच्छगणरसदधिस्वर्पिदुग्धैश्च युक्तं
पक्त्वा पाके सुजाते गलितमुदरशान्त्यै पिबेदल्पमल्पम् ॥
पीत्वा धारोष्णं प्रातरेवाग्निमध्ये
क्षीरं तोयाढ्यं साधु पक्त्वा सुखोष्णम् ।

सायं पथ्यायाः क्वाथः पक्षमित्थं
कृत्वा रिक्तश्चोदरी स्याच्छतायुः ॥ २ ॥
भेकराजरसैः सुभावितलोहयुक्तवरारज-
स्तुल्यभागवटच्छदोद्भवभस्म चाप्यभया पुनः ।
षट्पदोत्थरसेन पेषितमक्षमात्रविनिर्मितं ।
पिण्डमस्यति पाण्डुरोगमुदश्विता सह सेवितम् ॥३॥
नवायसप्रतीवापं लिहन्मूत्रश्रुतं गुडम् ।
पाण्डुरोगातुरो मर्त्यः सुखी स्यान्मधुमिश्रितम् ॥ ४ ॥
अयोमलरजःपथ्ये गृष्ट्यग्रेण सुपेषिते ।
तैलयुक्ते पिबेत् प्रातः पाण्डुरोगी सुखी भवेत् ॥ ५ ॥

इति श्रीकालिदासवैद्यविरचितायां वैद्यमनोरमाया-
मुदरपाण्डुरोगाधिकारो नाम नवमः पटलः ।

अथ कामलाधिकारो नाम दशमः पटलः ।

शङ्खं विघृष्य सहसा प्रातः पीतं च सप्ताहात् ।
अपहरति कामलार्तिं बाणो रामस्य ताटकां भीमाम् ॥१॥
मधुना निशया धात्र्या क्षीरेण वा मिश्रितः प्रगे पीतः ।
स्यान्मण्डूकीस्वरसः कामलिनां हितकरो नृणाम् ॥ २ ॥
व्योषं धात्रीं रजनीं लोहं च सिताज्यमधुसमेतानि ।
उपयुज्य कामलार्तः सुखी भवेद्वासरारम्भे ॥ ३ ॥
अञ्जटासहितस्तक्रकल्को जयति कामलाम् ।
रसो वा भृङ्गराजस्य निषिक्तो भूरि मूर्धनि ॥ ४ ॥
कामलार्तस्तु तरुणं भुञ्जीत त्रिदिनं प्रगे ।
कामलायाः प्रशान्त्यर्थं वैकुण्ठं पाययेन्नरः ॥ ५ ॥
किमौषधगणैः कृतैः सकलमन्त्रवादैश्च किं
चिरेण बत जीवितुं यदि महाभिलाषोऽस्ति वः ।

सुवर्णवलयेन वा रजतकेन ताम्रेण वा
दहेत मणिबन्धने सपदि कामलारोगिणः ॥ ६ ॥
सुवहापत्रस्वरसः किञ्चित्तैलेन सह पीतः ।
कामलमाशु निहन्याद्रावणमिव पुण्डरीकाक्षः ॥ ७ ॥
श्रेष्ठा[1]गुडूचीपिचुमन्ददार्वीत्वगञ्जटाभिर्विधिना कृतं यत् ।
पथ्याकषाये घृतमाशु हन्यात्तत्कामलां कालनिशासमानाम् ॥

इति श्रीकालिदासवैद्यविरचितायां वैद्यमनोरमायां
कामलाधिकारो नाम दशमः पटलः ।

अथ शोफ विसर्पश्वित्रकुष्ठाधिकारो नामैकादशः पटलः ।

पथ्यापुनर्नवनिशाकणमूलवह्नि-
विश्वाम्बुजीरकसुरद्रुममागधीनाम् ।
क्वाथं पिबेच्छ्वयथुदण्डधराच्च जीवो-
ऽप्युत्तिष्ठते शिवसमाश्रितबालतुल्यः ॥ १ ॥
समूलतूलं संशुष्कं कार्पासं भस्मसात्कृतम् ।
तद्भस्मद्विगुणं शालितण्डुलं पयसोदनम् ॥ २ ॥
घृतेन सह भुञ्जीत सर्वश्वयथुनाशनम् ।
परिणततुम्बीलतया विहिते क्वाथे शृता विलेपी या ॥ ३ ॥
रात्रौ तया च सिद्धः क्वाथश्च श्वयथुशत्रुर्मौ ।
पुनर्नवाभयाशुण्ठीकालशाकैः समैः शृतम् ।
जलं शोफं जयेत् पीतं प्रातः सायं च मात्रया ॥ ४ ॥
दशाङ्गिकूष्माण्डलताद्र्रकाणां
चूर्णं मधौ शोफजयाय लिह्यात् ।

---

१ 'श्रेष्ठा' त्रिफला । २ 'चित्रभद्रा' इति पाठान्तरम् ।

आदित्यरुद्रवसुभिश्च समानभागं
चूर्णात् पलालरजसो गृहधूमतश्च ॥ ५ ॥
दग्धस्य शङ्खरजसश्च विमिश्र्य चूर्णं
क्षीरेण शोफशमनाय पिबेदतन्द्रः ॥ ६ ॥
हरीतकीत्रिवृन्मूलकुलत्थैः साधु साधितः ।
क्राथस्तु रुबुतैलाढ्यः शोफदाहोदरापहः ॥ ७ ॥
अलर्केक्षुरकार्पासमुर्वरी(?)क्षारजं जलम् ।
आपादमस्तकमाप्तमप्याशु श्वयथुं जयेत् ॥ ८ ॥
इक्षुरक्षारसलिले पक्वं भक्तं विनाशयेत्
शोफं सर्वाङ्गसंभूतं गोमूत्रेण घृतान्वितम् ॥ ९ ॥
हरीतकीनागररात्रिसिद्धं जलं ज्वरोत्थश्वयथुं निहन्यात् ।
पीतं प्रभाते गुडगोक्षुराङ्घ्रिव्याघ्रीबलाविश्वशृतं पयश्च ॥ १० ॥
नीलीदूर्वावायसीकाकमाचीनिष्पावाख्याखस्तिकानां रसेषु ।
दूर्वासर्पिर्येन कल्केन तेन सिद्धं तैलं सर्ववीसर्पजित्स्यात्॥११॥
प्रातः पयसा पीता लिप्ता च विसर्पकं जयेन्नीली ।
तत्क्षीरं च तथाऽस्माच्छुम्भनिशुम्भौ यथा दुर्गा ॥ १२ ॥
कर्पूरवल्लीस्वरसे वासाचिञ्चाभवेऽपि च ।
अश्वगन्धासुगन्धाद्यावायसीसर्पगन्धिका- ॥ १३ ॥
नीलीभूमिकदम्बानां मूले सिद्धं तिलोद्भवम् ।
कक्षाविद्रधिवीसर्पहरं स्यात्लेपनेन तत् ॥ १४ ॥
शतधौतघृतं लिम्पेत् क्षीरिवृक्षत्वगम्बुना ।
विसर्पकविनाशाय दाहतद्दशमनाय च ॥ १५ ॥
तत्क्षणपतितैः करकैः सिक्ता संरक्षिता मृत्स्ना ।
धान्याम्लेन विलिप्ता नाशयति विसर्पकान् कृच्छ्रान्॥१६॥
विसर्पकग्रन्थिविपादिरोगान् लेपादिना तैलघृतापहारात् ।
विनाशयेद्दुग्धयुताऽऽशु शुभ्रा दूर्वा मसूरानपि पित्तजातान् ॥

क्षीरिद्रुमाङ्कुरहिमोत्पलसेव्यकुष्ठ-
गोपाङ्गनामधुकनाभिजलैः सुसिद्धम् ।
यद्वायसीस्वरसकल्कितदूर्वया च
तैलाज्ययोर्यमकमाशु विसर्पकघ्नम् ॥ १८ ॥
जम्बीरनीरपरिपीतगुडं नराणा-
मारम्भकालसमयेषु मसूरिकार्तिम् ।
सद्यः शर्म नयति गोपयसा प्रभाते
रुद्राक्षमप्यलमतीव रहस्यमेतत् ॥ १९ ॥
शिग्रुपत्ररसे सर्जरसं पिष्ट्वा मसूरिकाम् ।
उत्पन्नमात्रामालिम्पेत् सा तदैव विनश्यति ॥ २० ॥
अश्वगन्धारसः खल्पपारदेन विमिश्रितः ।
लिप्तो मसूरिकार्तानां भवेद्रक्षाकरो नृणाम् ॥ २१ ॥
विश्वचूर्णमसितोष्णभसना गात्रमाशु परिपालयेन्मुहुः ।
शीतपित्तशमनाय चन्दनं छिन्नरोहरसपेषितं तथा ॥२२॥
तैलं दारुरुजासर्जयष्टीपाठावचूर्णितम् ।
शीतपित्तेऽमृताराजीकल्कं चाभ्यङ्गलेपनम् ॥ २३ ॥
उशीरं बहुशो लिम्पेन्नश्येत्स्वेदमसूरिका ।
चन्दनं च तथा स्नानं शमयेन्मन्दमारुतः ॥ २४ ॥
गुडेन राजद्रुमशोधितेन लिहन् सुसूक्ष्माणि रजांसि कुष्ठी ।
राजद्रुमत्वक्मुसलीन्दुलेखापथ्यानिशानामपरेन्दुतुल्यः ॥ २५॥
नीलीमरीच्योः स्वरसस्य कंसे पलाष्टभल्लातककल्कसिद्धम् ।
मर्श्यं जयेत्तैलमुदग्रकुष्ठं विपादिकामप्यतितोदभेदाम् ॥ २६ ॥
नीलीमूलत्वगसितसुमनोत्सर्ङ्गिणी(?)मूलवल्कं
भानुक्षीरोपणलशुननिशासिन्धुदार्वीर्विचूर्ण्य ।
एतैः सर्वैर्द्विगुणिततिलजैः क्षिप्रमार्द्रप्रयोगं
लेपात् कुष्ठं प्रबलमपि वा सप्तरात्रैर्निहन्यात् ॥ २७ ॥

तिलभल्लातकफलपथ्याचूर्णगुडमिश्रितं जयेत् कुष्ठम् ।
चूर्णं शशिलेखायाः सकृष्णतिलाब्दमुपयुक्तम् ॥ २८ ॥

स्नुहिजातिपूतिकैश्च शम्याकदिनेशपल्लवैर्जयति ।
उद्वर्तनमष्टादशकुष्ठान् गोमूत्रसंपिष्टैः ॥ २९ ॥

जलशैवालमादाय कण्डूक्लेदान्विते तनौ ।
परिपेष्य जलं सिञ्चेत्तत्तस्य परमौषधम् ॥ ३० ॥

नीलीमूलत्वक्तिलकमरिचैस्त्रिभ्येकभागिकैर्लेपात् ।
गोमूत्रेण सुपिष्टैः कण्डूयुक्तं जयेत् कुष्ठम् ॥ ३१ ॥

सर्पत्वचां समरिचां तिलतैलभृष्टां
यो लेपयेन्मुनिदिनं जलमस्पृशन् सः ।
कण्डूतिकुष्ठकिटिभान् चिररूढमूलान्
जित्वा सुखी भवति कामसमानकान्तिः ॥ ३२ ॥

कृष्णारिमेदपूलासपथ्यारग्वधमेहहा- ।
ऐरावतवराव्योषैस्सिद्धं कुष्ठकुलं जयेत् ॥ ३३ ॥

वातस्य मूलीस्वरसे विपक्वं धूमालकम्पिल्लरुजानिशाभिः ।
सुगन्धकाश्मशिलाकरञ्जैर्मधूकतैलं विनिहन्ति कुष्ठम् ॥ ३४ ॥

इठं समूलं संचूर्ण्य प्रभाते मधुना लिहेत् ।
अष्टादशविधं कुष्ठं षण्मासाज्जयति ध्रुवम् ॥ ३५ ॥

प्रातरासुतमग्निसमीपे स्थापितं च वसुभागशृतं यत् ।
नाडिकाष्टसमये निशि पीतं क्वाथमुत्तममशेषगदघ्नम् ॥ ३६ ॥

कर्पूरवल्याश्चूर्णं वा निम्बतैलेन सेवियेत् ।
विशीर्णनखमांसोऽपि पुनरेव युवा भवेत् ॥ ३७ ॥

बाणदलस्य स्वरसं लिकुचस्वरसं च तैलं च ।
संमिश्रितं प्रलेपयेद्धन्यात् कुष्ठानि दुष्टानि ॥ ३८ ॥

१ वातमूली 'वातंकोली' इति केरलेषु प्रसिद्धा ।

दृशनफलमवन्तिसोमके किञ्चिदुत्कथितशोधिते शृतम् ।
तीक्ष्णकल्कसहितं विनाशयेत्तैलमर्भककपालजान् गदान् ३९

भास्करकाण्डक्षारं स्वरसेनेक्ष्वाकुजेन संलिप्तम् ।
हन्यात् कपालकुष्ठं क्रौञ्चं गिरिं तारकारिरिव ॥ ४० ॥

मूलत्वक्पत्रपुष्पाणां कार्पासस्य रसे शृतम् ।
तैलं कपालजान् कुष्ठान् जयेत्तक्राम्लसाधितम् ॥ ४१ ॥

अर्कपत्ररसगाढमिश्रितान्नालिकेरपयसोऽर्कविमिश्रात् ।
तैलमुत्थितमपोहति व्रणान् राक्षसानिव मुरारिमार्गणः ॥ ४२ ॥

वायसजङ्घामूलं चाकुचिना नग्नजिद्दलं नक्तम् ।
धान्याम्लेन सुपिष्टं त्रिदिनादुद्वर्तनेन कुष्ठघ्नम् ॥ ४३ ॥

गौडीमेरण्डपत्रस्थां धान्यस्विन्नां प्रपीडयेत् ।
तद्रसस्तैलसंयुक्तो लेपात् कापालकुष्ठहा ॥ ४४ ॥

रक्तकरवीरमुकुलान्यादाय शतं शतेन मरिचेन ।
पिष्ट्वा शृतं तिलोत्थं कुडवं पामां हरेल्लेपात् ॥ ४५ ॥

बहुशोऽर्कदुग्धभावितगोजिह्वाग्रजोन्मिश्रितं तैलम् ।
भास्करतप्तं हन्यात् पाप्मानं पापसंभूतम् ॥ ४६ ॥

निम्बच्छदस्वरससाधितमर्कदुग्ध-
रक्ताश्वमारमुकुलोपणकल्कसिद्धम् ।
तैलं निहन्ति सहसैव समस्तपामां
छागप्रियस्वरससाधितमेवमेव ॥ ४७ ॥

भगवन् ! भास्करक्षीर ! पामाऽहमभिवन्दये ।
यत्र देशे भवान् प्राप्तस्तद्देशं न व्रजाम्यहम् ॥ ४८ ॥

अभिनवगोघृतेन मरिचस्य रजः पिबतां
हुतवहदेशकालबलदोषसात्म्यमवताम् ।
जघनकराङ्गुलिविवरकूर्परजानुभवाः
कररुहबान्धवाः सपदि यान्ति रुजः शमनम् ॥ ४९ ॥

तुङ्गद्रुमस्य परिपक्वफलं वितीर्यं
कृत्वाऽनलार्कपयसोर्द्विपिचुं पिचुं च ।
प्रक्षिप्य पूर्वमपरेण सुपेष्य तैल-
भागो गृहीत अपहन्ति समस्तपामाः ॥ ५० ॥
महिषविषाणमषी सहतीक्ष्णा किटिभमपोहति तैलसुपिष्टा ।
करजमलोत्थमषी च तथा स्यान्महिषमहासुरमाश्विव दुर्गा ५१
क्षारो महावृक्षज आशु हन्यादेरण्डतैलेन सहानुलिप्तः ।
कण्डूतिमन्तं किटिभं पुराणं सर्पं कठोरो गरुडो यथैव ॥५२॥
निशामरिचसिन्धूत्थैः सार्धं नृजलपेषिता ।
लेपात् किटिभसंहर्त्री कुलत्थशरपुङ्खिका ॥ ५३ ॥
जम्बीरस्वरसे पिष्टकासमर्दाङ्घ्रिलेपनम् ।
विचर्चिकानां सर्वेषां परमौषधमुच्यते ॥ ५४ ॥
त्रिफलां किञ्चिद्भृष्टां तैलेनालेपयेद्बहुशः ।
पादे विपादिकायाः पादं पद्मोपमं कुरुते ॥ ५५ ॥
कारस्कराश्विनिर्यूहे तत्कल्केन हविः शृतम् ।
गव्यं वा माहिषं प्रोक्तं लिप्तं हन्ति विपादिकाम् ॥ ५६ ॥
स्नुक्क्षीरपलसंसिद्धतैलसैन्धवलेपनात् ।
रोहेत् सहस्रधा भिन्नमपि पादतलं क्षणात् ॥ ५७ ॥
सिध्मा शाम्यति सहसा चूर्णालनिशाप्रलेपेन ।
गोमूत्रसंयुतेन द्वित्रिदिनैर्मर्दनान्नियतम् ॥ ५८ ॥
निषिञ्चेत्सावधानः सन् मूत्रस्याद्यन्तयोः स्रवे ।
तस्य सिध्मा प्रयात्यस्तं विचित्रमिदमौषधम् ॥ ५९ ॥
प्रलेपात्सिध्म यात्यस्तमपामार्गस्य भस्मना ।
केवलेन यथा पापं चन्द्रशेखरभस्मना ॥ ६० ॥

१ 'हरीतक्यास्त्रयो भागाद्दिशवा द्वादश भागिका । षड् भागाः स्युर्विभीतस्य त्रिफलेयं प्रकीर्तिता ॥' २ प्राज्ञं पुराणम् ।

सिध्मा शीघ्रं नाशमायाति तोये
लिप्ते स्नानं यत्र कुर्वन्ति काकाः ।
शस्त्रं हस्ते गृहीत्वा ये चरन्ति
स्पृष्टस्तेषां पाणिना सोऽपि सिध्मा ॥ ६१ ॥
दद्रौ गुडं प्रलिम्पेत्तस्याः कृमयो विनश्यन्ति ।
चिञ्चापत्ररसं वा कण्डूतिनाशमन्विच्छन् ॥ ६२ ॥
कलित्वक्साधिते तोये वासिता निशि वाकुची ।
पिष्ट्वा तैलेन पीता च श्वित्रशत्रुविनाशिनी ॥ ६३ ॥
तुषाम्भसा तालशिफां सशुण्ठीं
नाभौ कवोष्णां प्रदिहेत् कृमिघ्नाम् ।
प्रातः पिबेद्वा सुरसस्य मूलं
सनागरं कोष्णजलेन वापि ॥ ६४ ॥
जठरोपरि परिलिप्तं शरपुङ्खं पातयेद्धि कृमीन् ॥ [illegible] ॥
सकुलत्थैः शकलितैः जठराशुष्कपल्लवैः (?) ।
नालिकेरस्य निर्यूहः कृमिहा स्यात्सरामठः ॥ ६५ ॥
रोमशानां भृशं देहे क्षुरकर्म न कुर्वताम् ।
अन्वर्थसूचकाः सूक्ष्मा जायन्तेऽष्टपदा नृणाम् ॥ ६६ ॥
चित्रापत्ररसैर्वा रसैर्वा लिकुचपत्रसंभूतैः ।
उद्वर्तिते शरीरे नाष्टपदाः संभवन्ति पापिष्ठाः ॥ ६७ ॥

इति श्रीकालिदासवैद्यविरचितायां वैद्यमनोरमायां शोफविसर्पश्वित्र-कुष्ठाधिकारो नामैकादशः पटलः ।

अथ वातशोणितवातव्याधिस्थूलकृशाधिकारो नाम द्वादशः पटलः ।

चन्द्ररससंमितानां सैन्धवपिण्याकतैलानाम् ।
अम्लारनालकुडवे पक्वानां लेपनाज्जयेद्वातम् ॥ १ ॥

तैलं लिप्त्वा वातरोगोपशान्त्यै यामादूर्ध्वं शर्वरीसूक्ष्मचूर्णम् ।
लिप्त्वोद्वर्त्योद्वर्त्य तैलं हरेद्याम्यामादूर्ध्वं तत् पुनर्हन्ति वातम् २

वातः सर्वाङ्गसंभूतस्तैलाभ्यक्तस्य देहिनः ।
स्वेदेन शममायाति दहनो वारिभिर्यथा ॥ ३ ॥

धत्तूरस्वरसे शृतं तिलभवं द्विप्रस्थमात्माञ्जिणा
कंसे निष्कचतुष्टयद्विगुणितेनाक्षक्षपेनान्वितम् ।
अभ्यङ्गादनिलामयानपहरत्येरण्डशुण्ठीबला-
कोरण्डैः शृतमम्बु चासुरगणान् रामो यथा सानुजः ४

स्नुहीस्वरसपिष्टेन तैलेनाप्लावितेन च ।
छागगूढेन कोष्णेन लिम्पेद्वातरुजातुरम् ॥ ५ ॥

प्रभञ्जनार्तिशमनो मातुलुङ्गफलत्वचाम् ।
लेपः कोष्णजले पिष्ट्वा स्याल्लवङ्गत्वचां तथा ॥ ६ ॥

क्वाथेन कल्केन भूनागयुक्तं कोरण्डमूलस्य तैलं विपक्वम् ।
दुग्धेन चाशीतिवातामयघ्नं पानाङ्गलेपादिभिः शीघ्रमेतत् ॥७॥

एरण्डतैलं निर्गुण्डीस्वरसं च पृथक् समम् ।
पीत्वा कटीप्रदेशस्थं वातं जित्वा सुखी भवेत् ॥ ८ ॥

लवणारनालमिश्रैर्भृष्टैर्दृढवस्त्रखण्डपुटदिग्धैः ।
तण्डुलशकलैः स्वेदो वातार्तिं नाशयेत् सहसा ॥ ९ ॥

सुपक्वव्रीहिबाष्पाणां कटेनान्तरितात्मनाम् ।
उपरिष्टात्तु शयनं पृष्ठवातार्तिनुत् परम् ॥ १० ॥

क्रोष्टुशीर्षेण शृनाङ्गस्ताडयेत् क्रोष्टुशीर्षकम् ।
तेनैव शान्तिमायाति दुष्टः क्रोष्टुकशीर्षकः ॥ ११ ॥

धत्तूरपत्रस्वरसे सुतीक्ष्णं परिलोडितम् ।
भानुतप्तं मुहुर्लिम्पेज्जेतुं क्रोष्टुकशीर्षकम् ॥ १२ ॥

सनालान्युरुपूगस्य पत्राण्यन्योन्यबन्धनम् ।
कृत्वा छित्वा द्विधा ताभ्यां स्वेदस्तैलेन वातहा ॥ १३ ॥

कार्पासबीजाक्षतमाषसिन्धुकुलत्थकोरण्डनिशार्कमूलैः ।
धान्याम्लपिष्टैरसकृत् प्रलिम्पेन्नात्युष्णशीतैरवबाहुकघ्नम् १४

परिणतकेरीक्षीरे जम्बीरफलोदकेन समतुलिते ।
क्षणदासुरधूपयुतं तैलं ह्यवबाहुकं जयति ॥ १५ ॥

लिकुचरसस्नुक्क्षीरे क्षीरे तैलं समेतभूनागम् ।
सिद्धं हिनस्ति लेपादुत्तरमवबाहुकं क्षणतः ॥ १६ ॥

सीमन्तिनीनां पयसा प्रलिम्पेच्छुण्ठीं शताह्वां लिकुचोदकेन ।
ते जानुबाहुप्रभवानिलघ्ने स्यातां क्रमव्युत्क्रमलेपिते वै ॥ १७॥

सुप्तिर्भवति चेदङ्गौ पुंसामासनसेवया ।
तदन्यपार्श्वकर्णस्य मर्दनैरुपशाम्यति ॥ १८ ॥

दीर्घमार्गगमनेन पादयोस्तोदमस्ति यदि तैलमर्दनम् ।
कोष्णतोयपरिषेचनं निशि प्रोन्नताङ्घ्रिशयनं च शस्यते १९

आत्मक्षवथौ सहसा प्रणवं संकीर्तयेद्बहुशः ।
क्षवथौ 'आयुष्मान् भव' जृम्भायां स्फोटयेत्तथाऽङ्गुल्यौ २०

केदारसीम्नि संभूतं गोमयं तु प्रलेपयेत् ।
सशब्दयानः पादस्य चापल्येन स गच्छति ॥ २१ ॥

स्तब्धगात्रमनिलान्महाबलाकुष्ठधान्यतिलवातहास्थिभिः ।
लिप्तमाशु वशमानयेच्छनैस्तिन्तिणीत्वगनलेन तापितैः ॥२२ ॥

लशुनबर्बरगुग्गुलुनागरैर्विबुधदारुयुतैः शृतमम्बु यत् ।
ज्वलयति ज्वलनं कफकोपहृत् पवनमाशु जयत्यतिगर्वितम्२३

क्षुण्णे प्रसारिणीपत्रे निर्गुण्ड्याः सिकतां भृशम् ।
भृष्ट्वा निधाय बद्ध्वा च स्वेदनादनिलान् जयेत् ॥ २४ ॥

जानुप्रदेशजनितानिलनाशनाय
तैलं निशामिशिसुरद्रुमदेवधूपैः ।
सिद्धं जले लिकुचजन्मनि शस्तमेत-
च्छोफोग्रतोदसहिते रुधिरस्रुतौ च ॥ २५ ॥

जानुशोफानिलार्तिघ्नं धत्तूरोदरपाचितम् ।
पुनर्धान्याम्लसंपिष्टं लवणं चर्चितं मुहुः ॥ २६ ॥

कारस्करस्याङ्घ्रिचतुःपलेन क्षीराढके कल्कितलोडितेन ।
प्रस्थं पचेत्तैलमपाकरोति तद्वातरक्तं न तु तुल्यमस्य ॥२७॥

धान्याम्लमिश्रं चिञ्चाम्लं पटु तैलमिदं शृतम् ।
लिम्पेद्वातास्रनाशाय मृगनाभिमथापि वा ॥ २८ ॥

करञ्जवन्दाककुलीरमन्दिरैः प्रशस्तमुद्धेखनमम्लकाञ्जिकैः ।
कटूष्णमाश्वेव विनाशयेद्ध्रुवं प्रभञ्जनास्रं प्रवनो यथाऽम्बुदम्२९

अतिस्थूलशरीरो यस्तिलतैलं प्रगे पिबेत् ।
पिबेदसनसारस्य क्वाथं वा मधुसंयुतम् ॥ ३० ॥

मासद्वयं प्रकुर्याद्दशमरिचोपेतमेकताम्बूलम् ।
स्नात्वा सुशीतमम्भः पिबेत् कृशः स्यादतिस्थूलः ॥ ३१ ॥

भुक्त्वा तदार्द्रेण करेण देहं परामृशन् पञ्चदिनैः कृशोऽपि ।
पुष्टिं लभेत्स्त्रीजनमोहनाङ्गः सिध्मं च गात्रस्थितमाशु हन्ति३२

इति श्रीवैद्यकालिदासविरचितायां वैद्यमनोरमायां वातशोणितवात-
व्याधिस्थूलकृशाधिकारो नाम द्वादशः पटलः ।

अथ गर्भिणीचिकित्साधिकारो नाम त्रयोदशः पटलः ।

दशमूलानि च नलिनं कुष्ठमुशीरं नतस्पृक्के ।
एरण्डशिफां च पिबेद्गर्भाशयशोधनाय गोपयसा ॥ १ ॥

कटुकालाबुसंसिद्धं तैलमभ्यञ्जनाद्भवेत् ।
योनिदोषहरं नार्या गर्भमुत्पादयेदपि ॥ २ ॥

---

१ 'बिल्वोऽग्निमन्थः श्योनाकः काश्मरी पाटला स्थिरा । त्रिकण्टकः पृश्निपर्णी बृहती कण्टकारिका ॥ दशमूलमिदं श्वाससन्निपातज्वरापहम् ।'

पुत्रार्थं दम्पती रात्रौ शयीयातां मुदान्वितौ ।
पुष्पचन्दनताम्बूलयौवनैः समलङ्कृतौ ॥ ३ ॥

कणामूलकणादारुद्राक्षापुरगुडैः कृतात् ।
योनेरुद्वर्तनाच्चूर्णं सौभाग्यं जायते स्त्रियाः ॥ ४ ॥

ब्राह्मीवासामृतानिम्बशार्ङ्गेष्टादलजं रसम् ।
प्रातर्निपीय तैलेन वन्ध्याऽपि लभते सुतम् ॥ ५ ॥

बीजानि बीजपूरस्य क्षीरपकानि या पिबेत् ।
नारी, घृतेन सह सा क्षीरभुक् गर्भधृग्भवेत् ॥ ६ ॥

अथवाऽश्वत्थवन्दाकं गर्भदं क्षीरपाचितम् ।
गृहीतमश्वगन्धाया मूलं पुष्ये पिबेद्दतौ ॥ ७ ॥

क्षीरेण क्षीरभुग्भूत्वा पुत्रसंपदि मज्जति ।
शैवेन तपसा सिन्धौ ब्रह्मरूपे यथा तथा ॥ ८ ॥

कार्पासशलाटूनां कल्कं क्षीरे पिबेत्तु सप्ताहम् ।
वन्ध्या पुत्रोत्पत्तिं वाञ्छन्ती पुष्पदिवसेषु ॥ ९ ॥

वज्रवल्लीरसे तुल्यं तैलं तत्कल्कमिश्रितम् ।
ध्वजारोहणकल्याणदिवसे पार्वतीपतेः ॥ १० ॥

ऋतुस्नाता वधूः पिण्डं भक्षयेत् पुत्रकाङ्क्षिणी ॥ [1] ॥

वन्दाकमौदुम्बरमादरेण वन्ध्याऽङ्गना पुष्पविशुद्धिवारे ।
पूर्वं विरिक्ता लभते कुमारं छागस्य दुग्धेन सह प्रपीत्वा ॥११

काकमाचीशिफां पुष्ये कामं निष्पीड्य कन्यया ।
रसं स्नाता पिबेन्नारी लभेद्गर्भमनुत्तमम् ॥ १२ ॥

स्नात्वा चतुर्थदिवसे स्वभर्तृसंपर्कमाप्य निशि वनिता ।
पुत्रं लभेत सुभगं वामेतरपार्श्वसंयुक्ता ॥ १३ ॥

बीजपूरस्य बीजानि मूलं वा गर्भसंभवे ।
पिबेदाज्येन मूलं वा लक्ष्मणाहयगन्धयोः ॥ १४ ॥

---

१ 'मातुलुङ्गस्य' इति पाठान्तरम् ।

गिरिकर्ण्याः शिफा श्वेता कुमुदायाः कटीतटे ।
धार्यमाणा स्त्रिया गर्भस्थापनाय भवेत् प्रभुः ॥ १५ ॥
उदुम्बरशिखाक्काथे क्षीरं समधुशर्करम् ।
शालिं पिष्ट्वा पिबेद्गर्भविनिपातनिवर्तनम् ॥ १६ ॥
तरुणैर्नालिकेरस्य पुष्पैरौदुम्बरैः फलैः ।
अब्दैश्च कल्पितः क्काथो गर्भद्रावं निवर्तयेत् ॥ १७ ॥
लाक्षा यष्टीमधुकं क्षौद्रोपेतं सशर्करं लीढम् ।
पीता क्षौद्रोपेता मृद्वीका गर्भशूलहरा ॥ १८ ॥
पारावतशकृत्कल्को निपीतस्तण्डुलाम्बुना ।
गर्भिणीनामसृक्स्रावं निरुणद्धि सवेदनम् ॥ १९ ॥
मार्कवस्वरसं गव्यं क्षीरं च सदृशं पिबेत् ।
अन्तर्वत्न्या भवेत्तस्या नैव गर्भपरिच्युतिः ॥ २० ॥
समङ्गाधातकीपुष्पक्षीरलोध्रमहोत्पलैः ।
न गर्भो निपतेत् पीतैर्नातिमात्रजलस्थितैः ॥ २१ ॥
क्षीरेण पीता सक्षौद्रा कुलालकरमर्दमृत् ।
सहसा प्रतिबध्नीयाद्गर्भध्वंसं न संशयः ॥ २२ ॥
कर्कटीमूलसंसिद्धं क्षीरं शूलहरं परम् ।
गर्भिणी तु बलाक्काथसिद्धं सायं प्रगेऽपि वा ॥ २३ ॥
क्षीरपिष्टमचलाऽक्षकं पिबेद्देवदालिकुसुमोद्भवं रजः ।
शीघ्रमेव सुखसूतिमावहेन्नास्त्यतः परतरं तदौषधम् ॥२४॥
गर्भिण्याः सुखसूत्यर्थं किमन्यैर्मन्त्रभेषजैः ।
सहस्रप्रस्थमम्ब्वाशु मेयं पुत्रस्य मातुलैः ॥ २५ ॥
कारस्कराक्षिसलिलेन विघृष्य लिम्पे-
न्नाभौ सुखप्रसवकाङ्क्षितसुन्दरीणाम् ।

१ 'गर्भभ्रंशं' इति पाठान्तरम् ।

तद्वद्विषं च करपादतलेषु बाले
जाते तमाशु सलिलैः परिशोधयेच्च ॥ २६ ॥
वारिघृष्टं विशालाया मूलमाज्येन संयुतम् ।
अधोमुखमधो नाभौ लिम्पेत्सद्यः प्रसूतिकृत् ॥ २७ ॥
वासापरूषफलिनीकाकमाचीशिफाः पृथक् ।
पिष्टा नाभेरधो लिप्ता गर्भनिष्कामणप्रदाः ॥ २८ ॥
पक्कं तिलोद्भवं नार्या विशल्यास्वरसेन च ।
हन्ति गर्भापरासङ्गं गुह्यनाभिकराङ्घ्रिगम् ॥ २९ ॥
प्रपुन्नाटशिफा गाढं क्षुण्णा योनौ धृता भवेत् ।
क्षुण्णा सतैला वर्षाभूशिफा च सुखसूतिदा ॥ ३० ॥
तद्वन्मूर्धनि विन्यस्ता छित्रा स्नुक्क्षीरबिन्दवः ।
वचोग्रातिविषासर्पनिर्मोकैर्धूपनं भगे ॥ ३१ ॥
करञ्जतैलसंयुक्तैर्गर्भमाश्वेव पातयेत् ।
करवन्दां प्रयत्नेन गोमूत्रोपरि वेश्मनः ॥ ३२ ॥
स्थापयेत्तेन जायेत गर्भशल्यविनिष्क्रमः ।
स्वरसेनेषुपुङ्खाया कृतान्मधुकरस्य वा ॥ ३३ ॥
नस्याच्च स्याद्द्रवं स्त्रीणां मूढगर्भसमुद्भवम् ।
पुटदग्धाऽहिनिर्मोकमषीक्षौद्रेण चाक्तदृक् ॥ ३४ ॥
सहसैव विशल्या स्यान्मूढगर्भाऽपि गर्भिणी ॥ ३ ॥
सिद्धार्थार्जुनपुष्पगुग्गुलुवचालाक्षामयूरच्छदैः
केशोशीरभुजङ्गशुक्तिसहितैर्धूपो गृहे निर्मितः ।
स्त्रीणां दम्पतिमूढगर्भजनितां बाधामहिद्रावका-
न्नाखून् भूतगणान् पिशाचनिकरान् गेहान्निरस्यत्यलम्॥
पीतं पुष्पलतापत्रं पिष्टं तण्डुलवारिणा ।
अपरां पातयेच्छालीमूलं मूत्रेण वाऽथवा ॥ ३६ ॥

१ 'गर्भाशयवराङ्गम्' इति पाठान्तरम् ॥

चम पूतिकरञ्जस्य वायसोदुम्बरस्य वा ।
पिष्टं तुषाम्बुना पीतमपरां पातयेत् क्षणात् ॥ ३७ ॥
अपथ्याद्दैवयोगाद्वा जातं मूढं भिषग्वरः ।
तत्तल्लक्षणमालोच्य क्षणान्निर्बाधमाहरेत् ॥ ३८ ॥
कुक्षौ वातेन धृतो गर्भो वर्षाद्विकारकारी स्यात् ।
तत्र क्षीरं प्रपिबेत् सघृतं कोष्णं करोति सुखसूतिम् ॥३९॥
पिष्ट्वा लिप्ते योनौ मूले खरमञ्जरीपुनर्नवयोः ।
नवसूतायाः शूलं योनिगतं सकलमपनयतः ॥ ४० ॥
सूतायाः कुशमुदरं पीतं तक्रेण मालतीमूलम् ।
मधुघृतपिष्टं व्योषं करोति शतत्रीरसो निशया ॥ ४१ ॥
प्रसूतिसमये यस्या न स्रवेद्रुधिरं ततः ।
शूलं स्याल्लशुनं गन्धलक्ष्मीं च भक्षयेत् सुखम् ॥ ४२ ॥
सूतायाः पृष्ठकट्यादौ शोफः स्याद्यदि पाययेत् ।
मयूरमूलपथ्याभ्यां सिद्धमम्बु दिनत्रयम् ॥ ४३ ॥
कृसरां सघृतक्षीरां शर्करामधुसंयुताम् ।
स्तन्याभिवृद्धये धात्र्या भोजनं परिकल्पयेत् ॥ ४४ ॥
यष्टीमधुकसंयुक्तं गव्यं क्षीरं सशर्करम् ।
पीत्वा धात्री भवेद्भूरिस्तन्यापूर्णपयोधरा ॥ ४५ ॥
दुग्धेन सूतया पीतं शालितण्डुलजं रजः ।
विदारीकन्दचूर्णं वा प्रभवेत् स्तन्यवृद्धये ॥ ४६ ॥
निशाकुमारीकन्दाभ्यां विशालाशिफयाऽथवा ।
स्तन्यदोषं समुत्पन्नं हन्याल्लेपेन तत्क्षणात् ॥ ४७ ॥
कुर्वते यदि सूताया व्याधयो वेदनां भिषक् ।
कुर्यात्तत्तत्प्रतीकारैश्चिकित्सां शास्त्रकोविदः ॥ ४८ ॥
एकादश्यां प्रभाते शिशिरतरजलैर्मिश्रितैरुष्णतोयैः
स्नातो बालश्च मात्रा सह हितमचिराद्देहशौचं च कुर्यात् ।

शङ्खं वक्त्रेऽथ सूत्रं कटितटनिकटे नेत्रयोरञ्जनं च
द्वादश्यां सन्मुहूर्ते शकटनिरसनं नामधेयं च कुर्यात् ॥४९॥
दैवज्ञस्याज्ञया यत्र बालो जातो निकेतने ।
शकुनं तस्य निक्षिप्तं तस्य रोगहरं विदुः ॥ ५० ॥
अन्नप्राशनकालात् प्राङ्मुण्डनानि न कारयेत् ।
भस्मसिद्धार्थकौ तस्य मस्तके निक्षिपेत् सदा ॥ ५१ ॥

इति श्रीवैद्यकालिदासविरचितायां वैद्यमनोरमायां गर्भिणीचिकित्साधिकारो नाम त्रयोदशः पटलः ।

अथ बालचिकित्साधिकारो नाम चतुर्दशः पटलः ।

जाताः केचिच्छिशवः क्रान्ताः स्युर्मार्गसङ्कटतः ।
शीतसलिलसंयुक्तैस्ताम्बूलैर्वीजयेद्वदने ॥ १ ॥
जातस्य पञ्चमदिने शुभदे मुहूर्ते
पञ्चायुधाभरणधारणमिष्टमाहुः ।
श्रीगोकुले मुररिपोरिव नन्दगोपो
रक्षां च बालजनको भसितेन कुर्यात् ॥ २ ॥
विधाय वेधाः प्रथमर्णवानि द्वाराणि गर्भे सति किल्बिषेण ।
पूर्वेण पश्चात् पिदधाति पश्चादग्रेण शस्त्रस्य भिषक् प्रकुर्यात्(?)३
निष्ठीवे जृम्भायां दक्स्पर्शे शौचं च सन्ध्ययोः कुर्यात् ।
लवणारिष्टच्छदनैः परिस्तरेदुपरि बालस्य ॥ ४ ॥
तुषमषीतिलजोदनपत्रकैः सहितपात्रयुतोदकदर्शनम् ।
सपदि दृष्टिविषं विनिहन्ति तत्रिनयनाभरणं भसितं यथा ॥५॥
यो गजेन्द्रविषाणाग्रलग्नमृत्स्नमुपेतया ।
पुण्ड्रो रोचनया क्लृप्तः सर्वग्रहविमोक्षणः ॥ ६ ॥
छर्दिर्भवेद्यदि पयः पिबतोऽर्भकस्य
वक्त्रे मुहुर्वदनमारुतफूत्कृतेन ।

शीतोदकेन तु जयेज्जननी तु गण्डे
तं पाययेद्विपगमङ्गुलिताडनेन ॥ ७ ॥
हायनत्रितयादूर्ध्वं स्तन्यं पिबति यः शिशुः ।
निवर्तयेत् क्रमान्निम्बपत्रलिप्तात् पयोधरात् ॥ ८ ॥
सानाहशूलातीसारं साटोपं जठरं शिशोः ।
बिन्दुभिर्बहुभिर्व्याप्तं दहेत् सूक्ष्मशलाकया ॥ ९ ॥
क्षुतः संजायते यस्य मध्ये भुक्तस्य यस्य वा ।
गात्रे कम्पप्रभो वातस्तावुभौ प्रोक्षयेज्जलैः ॥ १० ॥
रात्रौ जल्पति यो बालो दन्तान् संघट्टयेत्तथा ।
तावुभौ भवतां शम्भोः प्रदक्षिणपरौ निशि ॥ ११ ॥
यो मेहति कटे मूत्रं रात्रौ स्वप्ने दिने दिने ।
बालः कृष्णावतारस्य विष्णोः पादोदकं पिबेत् ॥ १२ ॥
क्षीरे वा सर्पिषि वा मूर्ध्नि गते सति शिशोः प्रमादेन।
मूर्धनि रोमावर्ते धमयेन्मुखवायुना जननी ॥ १३ ॥
प्रमादात् पतितं बालं पालयेत् पादपांसुभिः ।
मृत्पिण्डेन ततो मूर्ध्नि त्रिः परिमृज्य प्रोक्षयेत् ॥ १४ ॥
बालगात्रे प्रमादेन क्षुतोद्भूतजलाणवः ।
पतन्ति चेत् क्षणादेव त्यजामीति वदेत् क्षुतम् ॥ १५ ॥
अनवधानतया गृहमार्जनी स्पृशति यद्यपि गात्रमथ क्षणात् ।
शिरसि दीपशिखा च शिशोः क्षणात् कनकपात्रजलेन विशोधयेत्

देहे तु कस्य च निरीक्षणमात्रभीत-
बालस्य फालनिहितं भसितं शिवाय ।
धाराधरस्य परुषध्वनिनाऽतिभीत-
बालस्य चार्जुनकथाश्रवणं सुखाय ॥ १७ ॥
कटीप्रदेशे घण्टां च कण्ठे मूर्ध्नि करे क्रमात् ।
वचानिम्बेन्द्रवल्लीनां मणीन् बालः सदा धरेत् ॥ १८ ॥

नोद्वेगमस्य जनयेन्नैनं कश्चिदप्यपास्य गच्छेद्वा ।
अन्यस्तनहस्तासनशयनादपि परिहरेदेनम् ॥ १९ ॥
पूतीकशुक्तिकापाठामुस्ताक्वाथे शृतं घृतम् ।
पञ्चकोलयवक्षारैरामातीसारनुच्छिशोः ॥ २० ॥
स्तनन्धयस्य बालस्य हिक्का स्याद्यदि वेगिनी ।
मूर्ध्नि वक्षसि चाभ्यङ्गं कृत्वा तृणकणं क्षिपेत् ॥ २१ ॥
प्रसारिणीकल्ककषायसिद्धं तिलोद्भवं नावनपानलेपैः ।
हिक्कां निजां नाशयति त्रिमासात् पौलस्त्यलक्ष्मीमिव रामभद्रः॥
सव्यापसव्ययोगेन जिह्वां दन्ताग्रयोर्बहिः ।
प्रवर्तयेदयत्नेन सायं प्रातस्तु वाग्भवेत् ॥ २३ ॥
महोक्षशृङ्गसंलग्नमृद्गोरोचननिर्मितम् ।
तिलकं भूतवेतालकूष्माण्डादीञ्जयेच्छिशोः ॥ २४ ॥
राज्युग्राफणिनिर्मोकहिङ्गुनिम्बच्छदैः कृतः ।
स्यात्सिद्धोऽयं महाधूपो डाकिन्यादिप्रतिक्रिया ॥ २५ ॥
मञ्जिष्ठाद्विनिशाकुचन्दनवचाहिङ्गुप्रियङ्गुद्रुम-
ज्योपारग्वधजीरकारविवराभार्गीकरञ्जास्थिभिः ।
पिष्टैराजजलेन हन्ति रचिता वर्तिः समस्तान् ग्रहान्
स्नानोद्वर्तनपानलेपनविधौ धूमे च संयोजिता ॥ २६ ॥
ग्रहपीडितबालस्य ष्ठीवनं च क्षणाद्भवेत् ।
कुर्यात्तत्पार्श्वयोः शीघ्रं भेदं वै कंसभाण्डयोः ॥ २७ ॥

इति श्रीकालिदासवैद्यविरचितायां वैद्यमनोरमायां बालचिकित्साधिकारो नाम चतुर्दशः पटलः ।

अथ भूतग्रहाधिकारो नाम पञ्चदशः पटलः ।

उषसि पयसि पीतं पुण्डरीकस्य मांसं
जयति मनसिजातोपद्रवोन्मादतापान् ।

जनयति तनुपुष्टिं तद्धि मांसादमांसं
किमुत करबलत्वं तस्य सद्योहतस्य ॥ १ ॥
मधुमधुकमागधीनां खर्जूरशतावरीकशेरूणाम् ।
सविदारीणां कल्कः पानादुन्मादमपहरति ॥ २ ॥
पुण्ड्रेक्षुकाण्डरेणुस्तु सस्तन्यस्तुल्यशर्करः ।
न्यस्तो घ्राणमुखे सद्यः सर्वोन्मादविनाशनः ॥ ३ ॥
रेणुः क्षीरेण संयुक्तः कर्णिकारप्रसूनजः ।
उन्मादपीडिते नस्यं मात्रया रचितो हितः ॥ ४ ॥
द्राक्षाब्दयष्टीमधुकखर्जूरहिमकणाम्भोभिः ।
स्तन्यमधुघृतसितेक्षुस्वरसेनोन्मादनाशः स्यात् ॥ ५ ॥
साधितं षोडशगुणकूष्माण्डस्वरसे घृतम् ।
यष्टिकल्कं प्रगे पीतमुन्मादापस्मृती जयेत् ॥ ६ ॥
पानाभ्यञ्जननस्याद्यैः पित्तमत्युल्बणं जयेत् ।
धात्रीस्वरससंयुक्तमाज्यं ह्यय्यङ्गवीनवत् ॥ ७ ॥
ब्राह्मीस्वरसे सिद्धं कुष्ठवचाशङ्खपुष्पिकागर्भे ।
आजं पीतं सर्पिः सर्वापस्मारदोषघ्नम् ॥ ८ ॥
श्रीवासागरुदारुप्रियङ्गुवंशत्वगोतुविट्कुष्ठम् ।
साज्यं पिष्टमजाया मूत्रेण छायया शुष्कम् ॥ ९ ॥
तैर्धूपो ब्रह्मसहो नाम्नाऽपस्माररराक्षसपिशाचान् ।
भूतग्रहांश्च सर्पान् ज्वरं च चातुर्थकं हन्यात् ॥ १० ॥
सौभाग्यविहीना या पुष्पपीडिता च या भवेन्नारी ।
यासां मेहो भवति तासां च हितो भवेद्धूपः ॥ ११ ॥
एतद्धूपविधानैर्मन्त्री मन्त्रं जपेदेतम् ।
मन्त्रोऽत्र हितरणये स्वाहेति प्रणवयुक् पूर्वम् ॥ १२ ॥
सद्यं यावद्भवति बहुशस्तापयित्वा सुतापं
स्तन्यं प्रातः सुनिपुणभिषक् पाययेद्भ्रान्तचित्तम् ।

साज्यक्षीरं दशदिनमपि क्षीरमेवं प्रपीतं,
स्तन्ये घृष्टं कतकतरुणा पाययेत् स्यात्सुखाय ॥ १३ ॥
बलांशुमत्योर्द्वन्द्वं च बृहतीगोक्षुरस्य च ।
द्वात्रिंशन्निष्कमेतेषां क्षुण्णं प्रत्येकमाहरेत् ॥ १४ ॥
द्रोणार्धे सलिले क्षिप्त्वा पादशेषे विपाचिते ।
अमृतास्वस्तिकवरीमूर्वाकन्यारसं पृथक् ॥ १५ ॥
कुडवं कुडवं दत्त्वा विसाचौड्गद्रुमात् फलात् ।
कदलीकन्दसाराच्च प्रत्येकं कुडवार्धकम् ॥ १६ ॥
दत्त्वा कल्याणकाख्यस्य घृतस्यौषधकल्ककम् ।
तस्मिन् विशालां हित्वा च हयगन्धां समावपेत् ॥ १७ ॥
क्षीराढकेन विधिवद्घृतप्रस्थं विपाचयेत् ।
उन्मादापस्मृती हन्यात् पित्तमत्युल्बणं तथा ॥ १८ ॥
धीमेधास्मृतिकृच्चैव दाहतृष्णाहरं परम् ॥ [१] ॥

इति श्रीकालिदासवैद्यविरचितायां वैद्यमनोरमायां भूतग्रहाधिकारो नाम पञ्चदशः पटलः ।

अथाक्षिकर्णव्रणग्रन्थिचिकित्साधिकारो नाम षोडशः पटलः ।

तुत्थस्यातपपक्वस्य गोमूत्रे च रसक्रिया ।
कुकूणकादिवर्त्मोत्थरोगराजिविनाशिनी ॥ १ ॥
अक्षिकूटे कफाकारं छित्त्वा मेदः समुद्धरेत् ।
वर्त्मरोगविनाशाय पिल्लादिशमनाय च ॥ २ ॥
विघृष्य करभौ प्रायः स्वेदयेन्नयने मुहुः ।
वर्त्मसंजातपिडका नाशमायान्त्यसंशयम् ॥ ३ ॥

---

१ 'वराविशालाहृद्वैलादेवदार्वेलवालुकैः । द्विसारिवाद्विरजनीद्विस्थिराफलिनी-नतैः ॥ बृहतीकुष्ठमञ्जिष्ठानागकेसरदाडिमैः । वेल्लतालीसपत्रैलामालतीमुकुलो-त्पलैः ॥ सदन्तीपद्मकहिमैः कर्षांशैः' इति कल्याणघृतकल्कद्रव्याणि ।

नरास्थिचूर्णं स्तन्येन कांस्ये घृष्टं प्रलेपयेत् ।
नयने बहिरन्तश्च कुकूणादिहरं परम् ॥ ४ ॥
तुत्थाभयाफेनशिरःकपालैर्जम्बीरसारे मसृणं प्रपिष्टैः ।
वर्तिः कृता स्तन्यविघर्षिता स्यात् पिल्लार्मपूयालसपोथकिघ्ना ॥५
त्रिफलाकल्कमध्यस्थं परिदग्धं तुषानले ।
तुत्थं तुषाम्भसा पिष्टं वर्त्मरोगविनाशनम् ॥ ६ ॥
पलाशवृक्षक्षतजं ससैन्धवं गौडीपिशाचीक्षुरसेन पिष्टम् ।
क्षौद्रेण चन्द्रेण च संयुतं द्राग्विनाशयेद्वर्त्मरुजं महान्तम् ॥७॥
असितपललचूर्णं प्रान्तचिञ्चामयाभ्यां
समघरणघृताभ्यामल्पतीक्ष्णान्विताभ्याम् ।
नरसलिलयुताभ्यां मातुलाभ्यां मुरारे-
र्मसृणतरमपि पिष्टं वर्त्मरुङ्नाशनाय ॥ ८ ॥
श्वेतपूलासमूलत्वक्कल्कैश्चिञ्चाम्लकेन च ।
व्रणेषु तापरागौ च चिञ्चापुष्पोद्भवैर्जयेत् ॥ ९ ॥
पिष्टं कंसद्वयाघृष्टं स्तन्ययुक्तं दृगार्तिनुद् ॥ [1] ॥
काञ्जिकायससंपिष्टं कंसाभ्यां घर्षितं बहिर्लिप्तम् ।
चिञ्चास्थ्यङ्कुरमचिराद्बालस्य कुकूणकं जयति ॥ १० ॥
अन्तर्बहिर्नयनयोर्गिरिकर्णिकायाः
पुष्पं गवां पयसि पेषितमर्भकानाम् ।
संयोजयेद्दशनजन्मनिदानभूतं
रोगं कुकूणकमपोहति शीघ्रमेव ॥ ११ ॥
मस्तुना सह ताम्रस्थं मधुकं स्यात् कुकूणके ।
सैन्धवं च तथा पथ्यातण्डुलं मस्तुघर्षितम् ॥ १२ ॥
अत्यन्तपक्वकदलीफलमार्जनेन
दाहास्ररागशमनं भवति क्षणेन ।

१ 'कंसाभ्याम्' इति लक्ष्मणा पाठः । २. 'भवतीक्ष्णानाम्' इति पाठा-
न्तरम् ।

सीमन्तिनीपयसि मेघरवस्य मूलं
संघृष्य तेन परिषेचनमुत्तमं च ॥ १३ ॥
इक्षुमूलमधुकाञ्जनदार्वीलोध्रगैरिकपटुत्रिफलानाम् ।
लेपनं बहिरिदं नयनानां क्षीरपिष्टमपहन्ति विकारम् ॥१४॥
आतपालोकपीतानां सबाष्पाणां सहोष्मणाम् ।
समेघनादमधुकं स्तन्यं सिञ्चेद्दिनत्रयम् ॥ १५ ॥
सबिसं सविदारि सोत्पलं ससिताकंसकशेरुचन्दनम् ।
मधुकेन समं त्वजापयः परिषेकेण दृगामयाञ्जयेत् ॥१६॥
रोहिणीतुत्थकह्लारोत्पलकेसरनिर्मिता ।
दार्वीक्वाथेन गुटिका पित्तार्मव्रणनाशिनी ॥ १७ ॥
त्रिफला मधुकेन संयुता कतकेनापि सदारुरात्रिणा ।
नयनामयजित्, सुसेकतः सलिलं तुङ्गतरोर्विपाचितम् ॥१८॥
प्रस्थे पयसि संपक्वं गवां पथ्याचतुष्टयम् ।
आपन्नं[1] तेन संपिष्टं बहिर्लिप्तं दृगार्तिनुत् ॥ १९ ॥
बाष्पस्वेदेन पयसो गवां नेत्रार्तिनाशनम् ।
स्यादेरण्डशिफासिद्धपयसाऽऽश्च्योतनं तथा ॥ २० ॥
मेघनादशिफासमानतडागशुक्तियुतं पयः ।
सेचितं च निहन्ति तोदमसह्यमक्षिभवं नृणाम् ॥ २१ ॥
तत्फलं[2] घृतभर्जितं परिपेषितं निशि क्षिपेत् ।
सव्रणेऽक्ष्णि निर्व्रणं भवति क्षणात्त्रिचतुर्दिनैः ॥ २२ ॥
चिञ्चापत्रस्वरसं पयसा संयोज्य घर्षितं कंसे ।
लिप्तं बहिर्नयनयोः शमयति रागाश्रुतोदसंरम्भान् ॥ २३ ॥
कन्यास्वरससंपिष्टा त्रिफला सप्तवारकम् ।
पुनस्तस्याः पुटे स्विन्ना सक्षौद्रा नेत्ररोगहा ॥ २४ ॥

१. आपन्नं मरिचम् । २. तस्य पूर्वश्लोकस्थस्य मेघनादस्य फलं तत्फलम् ।

बिल्वशठालुकरञ्जफलास्थिव्योपनिशाद्वयशङ्खपुनर्भ्वैः ।
तुल्यमथैभिरियं गुटिका द्राङ्नेत्रगतामयहा जलपिष्टा॥२५॥
दार्वीवल्कलसैन्धवाञ्जनकणातुल्याब्धिफेनोषणै-
र्यष्टीताम्रसमन्वितैः सुमसृणं क्षौद्रेण पिष्टैः कृता ।
एषा हन्ति रसक्रिया नयनयोः पिल्लादिवर्त्मामयान्
क्षोदस्रावनिशान्ध्यशुक्रतिमिराण्यन्यांश्च नेत्रामयान् २६
दुग्धपात्रपक्वमर्कबीजमाशु नाशये-
दन्धकारमक्षिसंभवं नृणां सुनिश्चितम् ।
तद्वदेव शुक्रपुष्पमुष्टिमूलमप्यलं
ताम्रपात्रघृष्टमम्लकाञ्जिकाच्छवारिणा ॥ २७ ॥
परिणतनक्तमालतरुवल्करजःकुडवं
कुडवमथोषणस्य लिकुचस्य फलस्वरसम् ।
द्विकुडवमाढकेन पयसा च गवां सहितं
दिवसमुखे विशुद्धकलशेऽथ सुसंस्क्रियताम् ॥२८॥
अन्येद्युर्बहुशः खजेन मथिताच्चस्माद्गृहीत्वा रसं
प्रक्षाल्य प्रबलेन कंसयुगलेनाकार्ष्ण्यभावं शनैः ।
संघृष्येन्दुविमिश्रितं तिमिरजित् स्यादञ्जितं स्वल्पशः
सायं सीसशलाकया प्रतिदिनं नाम्ना त्विदं भास्करम् ॥
पिप्पलदलकुवलयदलमास्येन चर्वणं चिरं कृत्वा ।
दृढधवलाम्बरनिहितं सिञ्चेद्दृशि तिमिरनाशाय ॥ ३० ॥
अश्वत्थपत्रकुवलयदलचन्द्रैः कृता गुटिका ।
तिमिरापहा प्रसिद्धा भास्करकिरणावलीव दिवसमुखे॥३१
सितगिरिकर्णिकापुष्पान्नन्द्यावर्तस्य पुष्पाच्च ।
स्वरसेन तालवृन्तात् स्त्रीस्तन्येनापि सुमसृणम् ॥ ३२ ॥
दृषदि पिष्टं केशक्षारं मधुना निशया च संयुक्तम् ।
नेत्रे निषिच्य नचिरात्तिमिरार्तो भवेद्भास्वान् ॥ ३३ ॥

चिञ्चास्वरसनिघृष्टं मरिचं सायन्तने तथा साज्यम् ।
अक्षिनिषिक्तं शमयति कण्डूं तिमिरं च वातोत्थम् ॥३४॥
यन्मातुलुङ्गपिचुमन्दवराकरञ्ज-
जम्बीरशिग्रुफलबीजरजः प्रगृह्य ।
चिञ्चाफलाम्लरसमर्दितमातपाच्च-
त्स्नेहं जयेत्तिमिरमिन्दुविमिश्रितं द्राक् ॥ ३५ ॥
मूलं पालंक्यायाः कृष्णाशङ्खौ च तुरगगन्धायाः ।
मूलं पृथक् पृथक् स्यान्निष्कं तुत्थं चतुर्निष्कम् ॥ ३६ ॥
जम्बीरसारपिष्टा गुटिकेयं नेत्ररोगतिमिरहरी । ३
दिनावसाने रुधिरं पलाशादादाय नेत्रे सहसैव दद्यात् ।
नक्तान्ध्यमाश्वेव विजित्य जीवेच्चन्द्रातपे चाक्षरवाचकः स्यात् ॥
खद्योतैः सह भक्षितं दिनमुखे रम्भाफलं नाशये-
न्नक्तान्ध्यं तिलजोषणाक्षतयुतैः कोशातकीपल्लवैः ।
सिद्धं तद्वदपूपमन्यदपि तज्जम्बूप्रवालान्वितं
स्विन्ना छागशकृत्कणोषणहविःसिद्धा वरिष्ठा तथा ३८
छत्तस्य वृत्तधवलं गृहमाशु किञ्चि-
द्घृष्टं रसेन तलपोटभवेन(?) पिष्ट्वा ।
कंसद्वयेन महिषीनवनीतयुक्तं
पिल्लापहं बहलबाह्यविलेपनेन ॥ ३९ ॥
पथ्यातुङ्गजलेनैव पिष्ट्वा स्फटिकजं रजः ।
महिषीनवनीतेन कंसघृष्टं तु पिल्लजित् ॥ ४० ॥
घर्माध्वगतसुजातं लवणं संगृह्य पाणिनाक्तेन ।
लिकुचरसक्षौद्राभ्यां कंसे संघृष्य योजयेत् पिल्ले ॥ ४१ ॥
मधुपिष्टो लवणमलो माहिषहय्यङ्गवीनसमभागः ।
पिल्लजिदाजविषाणं तद्वच्चैनैव लेपितं दृषदि ॥ ४२ ॥

वर्त्याऽर्कतूलकृतया शशविट्चूर्णेन पूरितोदरया ।
दीप्ताद्दीपादाप्ता मुष्णाति मषी च पिल्लगजम् ॥ ४३ ॥

पट्टकुनटीवरटीगृहमागधिकाजातिकुसुमरजनिरजः ।
पिल्लं हरेन्निघृष्टं क्षौद्रयुतं कांस्यताम्राभ्याम् ॥ ४४ ॥

पोत्रीकरभयोर्दन्तं हृदयास्थि च कुक्कुटात् ।
कौर्मं कपालं स्तन्येन पिष्टं समधु पुष्पहा ॥ ४५ ॥

नयनजनितपुष्पं यक्षदकुपल्लवस्य
स्वरसमपनयेद्द्राग्वासरान्ते निषिक्तम् ।
सिकततृणकणादीन् पातयत्यक्षिगान् द्राक्
सपदि सुपरिजग्धं तत्र पत्तूरमूलम् ॥ ४६ ॥

तृणादि कीटानि तथैव वालुका यदृच्छया नेत्रगतानि चेत्ततः ।
क्षणेन निष्ठीवनमुत्तमं विदुः किमौषधैः स्तन्यनिषेचनादिभिः॥
अनलेन सुतप्तमृत्सुपिण्डात्स्तनजाक्ताज्जनितः सबाष्पयोगः ।
अभिघातसमुद्भवं विकारं नयनस्याशु विनाशयेदवश्यम् ॥४८॥

नीरुक्छोफो भवेन्नेत्रे दहेत्सपदि माक्षिकैः ।
नवं कपालं कापित्थं मुहुर्लिम्पेत्सनागरम् ॥ ४९ ॥

तामलकी नेत्ररुजं पिष्टा स्तन्येन ताम्राक्ता ।
सैवाक्षिरोगमभिनवमपनयति विलेपनान्मूर्ध्नि ॥ ५० ॥

संचूर्णितं तैलसमन्वितं च विघट्टितं माधवमातुलाभ्याम् ।
निष्पीड्य वस्त्रेण निषेचनेन पटुः पटु स्यान्नवनेत्ररोगे ॥ ५१ ॥

नवनवनीतसनाथं कल्कं कृष्णारिमेदपत्रोत्थम् ।
बहिरालेपेन जयेदर्मादीनश्रुतोदशोफाढ्यान् ॥ ५२ ॥

वासादलकाञ्जिकया वासः पीतो दृशि स्पर्शात् ।
अर्माश्रुतोदकण्डूरागोच्छूनादिजित्सहसा ॥ ५३ ॥

१ 'पटुः समर्थम्' ।

मरिचतैलमहौषधदुग्धमित्युभयमर्पितमक्षिणि पृथक् पृथक् ।
कफमरुद्भवनेत्रविकारान्मदनबाणविकारमिवात्मवान् ॥ ५४ ॥

विशालारससंसिक्तचेलश्रवणपाणिना ।
परामृशेदभिष्यन्दजातमश्रुं मुहुर्मुहुः ॥ ५५ ॥

तुत्थमामलकफलत्वङ्मरिचं श्रुतिसागरेन्दुसमभागम् ।
जम्बीररसेन पिष्टं सक्षौद्रं चक्षुषोर्जयेद्रोगम् ॥ ५६ ॥

मरिचं श्वेतपूलासं हंसपादी च तुत्थकम् ।
एकद्वित्रिचतुर्भागं निम्बिना गुप्तभावितम् ॥ ५७ ॥
चिञ्चापत्ररसे पिष्टा सर्पाक्ष्यक्ष्यामयापहा ॥ ३ ॥

कदलीमूलगृञ्जनयुगलार्द्रकलशुनकन्दसंभूतम् ।
अम्बु निहन्ति कदुष्णं कर्णरुजं कर्णपूरणतः ॥ ५८ ॥

वर्वरीमूलनिर्यूहे छागमूत्राम्भसाऽपि च ।
त्रिसिन्धुरादिभिर्दध्ना तैलं सिद्धं श्रुतिं जयेत् ॥ ५९ ॥

कृतमालफलत्रिशूलिपादैः स्वरसे तस्य च दुग्धसार्धसिद्धम् ।
तिलजं श्रुतिशूलपूयकण्डूक्रिमिजालं विनिहन्ति शीघ्रमेव ॥६०

चिञ्चाफलस्वरससाधिततैलमग्र्यं
जम्बीरनीरशृततैलमपि प्रशस्तम् ।
भूनागसर्जशृततैलमतीव शस्तं
कर्णे सशूलिनि रहस्यपराङ्मुखे च ॥ ६१ ॥

वामे पाणौ गृहीत्वा सतिलजलवणान्यर्कपत्राणि वैद्यः
सोपानोत्सेधरूपं हुतवहहतया लोहयष्ट्या च दीर्घम् ।
कर्णे नीत्वा तदुत्थैर्जलकणनिकरैः पूरयेत्कर्णशूले
हा हेत्युक्त्वा प्रधावन्त्यहमहमिकया शेषरोगाश्च तत्स्थाः ॥

तैलं दुग्धं पयो वापि संशृतं श्रवणे क्षिपेत् ।
सपूयपूतीन् जन्त्वादीन् जयेदार्कमथापि वा ॥ ६३ ॥

लिकुचफलेऽल्पं लवणं निक्षिप्य विघृष्य तत्स्वरसम् ।
त्रिदिनं श्रवसि विदध्याच्छूलं पूयं च नाशयति ॥ ६४ ॥
महिषीनवनीतेन जलौकाहयगन्धयोः ।
चूर्णं संमिश्र्य संपक्वं पीतं कर्णं विवर्धयेत् ॥ ६५ ॥
महिषीनवनीतयुतं गोशृङ्गवचाश्वगन्धवहुमूलम् ।
दिनकरतप्तं कुर्यादंसस्थललम्बिनौ कर्णौ ॥ ६६ ॥
कवरीशुष्कलाङ्गलवासितं तिलजं शिशोः ।
कर्णस्रावं जयेच्चूर्णं कुलीरवसया यथा ॥ ६७ ॥
कटुत्रयसमानांशा व्रणघ्नी पीनसापहा ।
कषायचूर्णलेहाद्यैः सेविता निशि सादरम् ॥ ६८ ॥
मण्डूकपर्णीमरिचकुलत्थैः साधु साधितः ।
कषायः पीनसार्तिघ्नः कोष्णाम्बुपिबतां नृणाम् ॥ ६९ ॥
दुग्धार्कपत्रभूतिर्महिषीनवनीतमिश्रिता लिप्ता ।
दन्तच्छदजातानां रोगाणां नाशने शस्ता ॥ ७० ॥
हिमाम्बुपरिपातेन संजातमधरव्रणम् ।
निशि प्रशमयेन्नाभिस्तैलेन परिपूरिता ॥ ७१ ॥
चूर्णं हरितमञ्जर्याः सविश्वं श्लक्ष्णमर्दितम् ।
अन्तर्बहिश्च तद्वक्त्रं लिम्पेद्दन्तरुजापहम् ॥ ७२ ॥
बकुलजटाभवकल्कः पयसा पीतः प्रगे त्रिदिनम् ।
दृढतरमूलान् कुरुते दन्तान् वृद्धस्य किमुत बालानाम्॥७३
बाणपुङ्खशिफा क्षुण्णा दन्तमूले श्रिता जयेत् ।
दन्तरोगांस्तु यावत् प्राक् दन्तधावनमन्वहम् ॥ ७४ ॥
गाढताडनविलूनतण्डुलैस्तुल्यभागलवणं मुखोदरे ।
धारयेद्दिनमुखे मुखामयं वासरत्रितयसेवितं जयेत् ॥७५॥

१ 'शुण्ठीमरिचकृष्णाभिस्तुल्याभिः साधु योजितम् । समीरितं भिषक्श्रेष्ठै-
स्त्र्यूषणं च कटुत्रयम् ॥'

निष्ठीवेद्विष्ठिते मोहात्तच्च कण्ठरुजापहम् ।
गोमये ष्ठीवनं कुर्यात्तत्र मुस्तां च भक्षयेत् ॥ ७६ ॥
मूलं पराजितायाः समरिचमास्यस्थमाशु शूलहरम् ।
तद्दलमपि दिवसमुखे कुवलयमपि बोधिपत्राख्यम् ॥७७॥
सह शुण्ठीपूगफलैर्वा मरिचगोमूत्रनालिकेरजलैः ।
क्वथितैरधिजिह्वादीन् कवलो विहितः प्रणाशयति ॥ ७८ ॥
नेत्रप्रक्षालनात् पूर्वं प्रातर्गण्डूषधारणम् ।
आस्यलूताविनाशाय केतकं ष्ठीवयेच्यहम् ॥ ७९ ॥
आस्यस्पृष्टं ग्रासमाज्येन मिश्रं रात्रौ दद्यान्मद्यपायी त्रिरात्रम् ।
लूतं हन्यादास्यजं यत्र यत्र प्रादुर्भूतं तत्र तत्रैव तद्वत् ॥ ८० ॥
गण्डीराख्यज्वलनहपुषावाणपुङ्खाङ्घ्रिबाण-
शौण्डीमूलैः सममिति समैर्विश्वमेषां कषाये ।
सिद्धं तैलं वदननिहितं वक्त्ररोगानशेषा-
नेलाशुण्ठीमगधमरिचोद्भूतकल्कं निहन्ति ॥ ८१ ॥
सर्पिस्तु नसि विन्यस्तं मधुकेन समायुतम् ।
हन्याच्छिरोर्तिं खेदो वा पायसान्नेन मूर्धनि ॥ ८२ ॥
मरिचस्य हरिद्रायाः शुण्ठ्या वा रेणुभिः कृता गुलिका ।
तैलाक्ता संलिप्ता ललाटपट्टे शिरोरुजं हन्यात् ॥ ८३ ॥
वातपित्तजनितं शिरोरुजं नाशयेन्मधुककल्कसाधितम् ।
नालिकेरपयसा शृतं त्विदं तैलमर्दितहरं च नावनात् ॥८४
सकृदाघ्राति विश्वोग्राभस्मसजातरजांसि यः ।
शिरस्तोदभवं दुःखं न जानात्येव निश्चितम् ॥ ८५ ॥
सूर्यावर्ते नस्यं कुर्यात्स्तन्येन विश्वयुक्तेन ।
अथवा तस्यागमने भुञ्जीत षड्रसोपेतम् ॥ ८६ ॥

१ 'अष्टावशिष्टे क्वथनात् क्षीरेऽष्टांशांश्च तण्डुलान् । पचेन्नातिद्रवघनं पायसा-
न्नमिदं स्मृतम् ॥'

हिममधुकमधूकसेव्यगर्भं भुजगलतारससाधितं तिलोत्थम्।
शिरसि रुजमपाकरोति कण्डूं कचशतनं च करोति हस्तकेशम्॥

वरायाः क्वाथसंसिद्धक्षीरोत्थदधिसाधितम्।
सर्पिर्मधुकसंसिद्धं नस्याद्वै मूर्धरोगजित्॥ ८८॥
कर्दमे निखनेत् केशान् तत्क्षणं शिरसि च्युतान्।
कुण्डकीकुल्य(?) सुस्निग्धकेशभारभरो भवेत्॥ ८९॥
जित्वेन्द्रलुप्तं रोमाणि जनयेद्भृङ्गजो रसः।
चिञ्चामलकयोश्चापि काललोहसमन्वितः॥ ९०॥
अङ्कोलबीजं द्वात्रिंशत्पलं सम्यक् पचेज्जले।
द्विद्रोणे पादशेषे तु तैलं तत्पतितं क्षिपेत्॥ ९१॥
प्रस्थोन्मितं वराक्काथे काललोहसमन्वितम्।
कालारिमेदसंभूतक्काथप्रस्थेन योजयेत्॥ ९२॥
इन्द्रवल्लीबकुलयोः कुमारीभृङ्गराजयोः।
चिञ्चामलकयोश्चापि मालतीनालिकेरयोः॥ ९३॥
स्वरसं केतकाचैव कल्कं दत्त्वा पचेत् पुनः।
बिभीतकास्थिसंभूतं कुडवं, कुडवं तथा॥ ९४॥
[१]गणादेलादिकाचैव, तदभ्यङ्गे सुयोजितम्।
केशानां दीर्घकृष्णत्वं करोति च निहन्ति च॥ ९५॥
पीतत्वं पिञ्जरत्वं च पलितं चेन्द्रलुप्तकम्।
अश्विभ्यां निर्मितं श्रेष्ठं केशजन्मनि पूजितम्॥ ९६॥

पुराणभित्तौ सलिलं मुहुः क्षिपन् प्रमर्दयित्वा परिगृह्य तन्मृदम्।
प्रलेपयेदङ्कुरकामुके व्रणे क्षुपोदकीं वा सघृतां [२]जैटीं वा॥९७॥

१ 'एलातुरुष्ककुष्ठफलिनीमांसीजलध्यामकं स्पृक्काचोरकचोचपत्रतगरस्थौणेयजातीफलम्। शुक्तिर्व्याघ्रनखोऽमराह्वमगरुः श्रीवासकं कुङ्कुमं चण्डागुग्गुलुदेवधूपखपुराः पुन्नागनागाह्वयम्॥' इत्येलादिगणः॥ २–'सर्ही' इति पाठान्तरम्।

व्रणपूतिपित्तेषु सदा लालां [१]सिञ्चेन्मुहुर्मुहुः।
कुष्ठेष्वपि जगत्यस्माद्रियते न महौषधम्॥ ९८॥
वराटीमेहसंयुक्तं सुगन्धासर्पगन्धयोः।
मूलं तैले विपक्वं स्यादुत्पित्तत्रणनाशनम्॥ ९९॥
द्रुतजातमतिसुकठिनं नाशयति व्रणं चिरन्तनं चापि।
स्विन्नं विमृज्य लिप्तं स्नुक्पत्रं पञ्चषैर्दिवसैः॥ १००॥
तिलारनालकथिता कुमारी पाचयेद्व्रणान्।
केवलाऽथ कुमारी वा पक्वापक्वविशङ्कितान्॥ १०१॥
आमे वा पच्यमाने वा पक्वे वा कन्यकां व्रणे।
स्विन्नां विनिर्गतास्रां च निक्षिपेत्स प्रणश्यति॥ १०२॥
कैडर्यस्वरसे सिद्धं तन्मूलच्छदरात्रिभिः।
तिलतैलं निहन्त्याशु व्रणान् दुर्गन्धदुर्जयान्॥ १०३॥
तदहः पतितैः पत्रैरश्वत्थोत्थैरशोषितैः।
संचूर्णितैर्निपिष्टैश्च लेपेनाशु जयेद्व्रणम्॥ १०४॥

[२]परिणतपरिशुद्धं पत्रसङ्गं कदल्याः
प्रहरति परिकोथोद्भूतपूर्वं व्रणानाम्।
उपनहविधिना वा लेपयेद्दोषहीनं
तिलजमपि विपक्वं क्षुद्रनाशस्य(?) पत्रैः॥ १०५॥

स्वरसे मूले च शृतं लिकुचनिशाभ्यां च सुरभिपुरुषाभ्याम्।
तैलं लवणांशयुतं व्रणशुद्धिं विरोपणं च तत् कुरुते॥ १०६॥

तिन्तिण्यङ्कोलधत्तूरपुनर्नवशिफान्वितैः।
धान्याम्लकथितैः पूर्वं स्वेदयेच्चिलजैर्व्रणम्॥ १०७॥
हरिद्राधातकीमूलत्वक्कृष्णामरिचोद्भवैः।
चूर्णैर्युक्तं भवेत्तप्तं व्रणे तान्तवसंस्रुतम्॥ १०८॥

१ 'क्षिम्पेत्' इति पाठान्तरम्। २ श्लोकद्वयमेतच्च दृश्यते केषुचित् पुस्तकेषु।

निक्षिपेद्बहुशस्तैलं व्रणा रोहन्ति निश्चितम् ।
जीर्णं च नालिकेरस्य तैलं हन्याद्व्रणं द्रुतम् ॥ १०९ ॥
तत्क्षणपतितं कोष्णं गवां करीषं व्रणं हन्यात् ।
सुनिषण्णकल्कलेपस्तद्वत् स्याच्छाकिनी च पटुयुक्ता ११०
भूधात्रीमूलसिद्धं पयसि तिलभवं लेपनेनाशु हन्या-
दुष्टं स्रावाढ्यमुग्रं व्रणमणुसुषिरं दीर्घकालानुपक्तम् ।
दुग्धं न्यग्रोधवृक्षोद्भवमपि निहितं जन्तुजालं व्रणेषु
प्रातर्मध्यंगतेऽर्के दिवसपरिणतौ चाप्तशास्त्रोक्तमेतत्॥१११॥
व्रणहानक्तमरिचैरेकार्धचरणांशकैः ।
क्षुण्णैर्भास्करसंतप्तं तैलं सर्वव्रणप्रणुत् ॥ ११२ ॥
स्तन्येन मसृणं पिष्टं पुष्पकुड्मलपल्लवम् ।
दुष्टव्रणेषु सर्वेषु युञ्ज्यादेरण्डसंभवम् ॥ ११३ ॥
प्रणाशयेत् समं चैलं तैलाभ्यक्तं व्रणेऽर्पितम् ।
यामादभ्यक्तमुद्धृत्य भित्तौ लग्नं तु रोपयेत् ॥ ११४ ॥
कुष्ठोद्भवं व्रणमपोहति शीघ्रमेव
कर्पूरतैलमसकृत् पिचुना निषिक्तम् ।
सारुष्करं तिलमहर्मुखभक्षितं च
भक्तिर्यथा तिमिरवैरिपदार्पिता तम् ॥ ११५ ॥
प्रतप्य संचूर्ण्य तिलोद्भवान्विता पुराणकुष्ठव्रणहा हरीतकी ।
तथैव शाखोटकसंभवं पयः पुराकृतं पापमिवेश्वरस्मृतिः ११६
सद्योव्रणेषु सहसा विदधीत धीमा-
नश्वीवपत्रतिलकल्कमथाज्यमिश्रम् ।
अश्वीत(?)भूमिरुहवल्कलकल्कमीष-
दाज्येन युक्तमपि रोपयतीति सिद्धम् ॥ ११७ ॥

१ 'चाङ्गेरीसदृशैः पत्रैः सुनिषण्णश्चतुर्दलः । शाको जलान्विते देशे चतुष्पत्रीति कथ्यते ॥'

क्षुण्णं मृदितं लवणं सिञ्चेन्निष्पीड्य तदनु बध्नीयात् ।
सद्योव्रणे त्रिदिवसं कुट्टितनिष्पावपल्लवं व्रणजित् ॥ ११८ ॥
दूर्वायाः खरमञ्जर्याः सोमराज्याश्च पल्लवैः ।
बध्नाति बन्धनं क्षुण्णैर्व्रणे शोणितनिःसृतिम् ॥ ११९ ॥
अपामार्गदलालेपः सद्यो बध्नाति शोणितम् ।
अतिप्रवृत्तमप्याशु सेतुबन्ध इवोदकम् ॥ १२० ॥
अकिञ्चनानामधिपस्य पत्रं स्तन्येन संपेष्य समर्पयेद्द्राक् ।
सद्योव्रणे रोपणमाशु वाञ्छन् कल्कं च दद्यादथ किङ्किसस्य॥
कुण्डलीकिसलयं ससैन्धवं नाशयेत्सपदि संभवं व्रणम् ।
नाशयेदथ तिलोद्भवं तथा तेन सिद्धमपि नात्र कौतुकम्१२२
जीवन्तीवल्कस्य सारं संपेष्य लेपयेत्रिदिनम् ।
पिच्छिलभावाद्दृढं संपीड्य शमयेद्व्रणं नियतम् ॥ १२३ ॥
भृष्टतण्डुलमषी सुपेषिता खिन्नपीडितसुधाफलाम्बुना ।
भिन्नमस्थि पिशितं च वेदनां सा सुखं नयति लेपनाद्ध्रुवम्१२४
भग्ने पूर्वमतीव शीतलजलैः सिञ्चेत्तदाऽऽर्द्राम्बरं
संपेष्य त्रिदिनं पुनः पटुयुतं तैलं प्रलिम्पेन्मुहुः ।
चिञ्चामुष्णजलेन तैलसहितां पीत्वैकरात्रं पुन-
र्लाक्षाचूर्णकृताढ्यमौष्ण्यरहितं गृष्टेश्च दुग्धं पिबेत् १२५
भग्ने नम्रे जाठरे वाऽस्थि सम्यक् स्थाने स्थाने संनिवेश्याम्बरेण।
तैलाक्तेनोद्बध्य तैलैः सुखोष्णैः सिञ्चेच्छेषं वातभैषज्यवच्च१२६
कोरदूषाक्षतान् भृष्ट्वा पिष्ट्वा भग्ने प्रलेपयेत् ।
चिञ्चास्थिमृत्कपालाश्वत्थकल्कं वा प्रलेपयेत् ॥ १२७ ॥
तार्क्ष्यं द्विनिशां दन्तीं श्वेतां ज्योतिष्मतीमरिष्टदलम् ।
मञ्जिष्ठां चालिम्पेद्भगन्दरे मूत्रपिष्टानि ॥ १२८ ॥

१. श्वेता सिता ।

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
पाठाविडङ्गेन्द्रयवैर्हिङ्गुभार्गीवचासितैः ॥ १२९ ॥
सर्षपातिविषाजाजीजीरकैः कुष्ठसंयुतैः ।
गजकृष्णाजमोदाभ्यां कटुकाचूर्णमिश्रितैः ॥ १३० ॥
समभागान्वितैरेतैस्त्रिफला संमिता भवेत् ।
त्रिफलासहितैरेतैः समभागश्च गुग्गुलुः ॥ १३१ ॥
एतत्संचूर्णितं सम्यङ्मधुना सुपरिप्लुतम् ।
योगराज इति नाम्ना भगन्दरहरः परः ॥ १३२ ॥
अर्शांसि वातगुल्मं च पाण्डुरोगमरोचकम् ।
नाभिशूलमुदावर्तं प्रमेहं वातशोणितम् ॥ १३३ ॥
महान्तमग्निसादं च कासश्वासं च कामलाम् ।
रेतोदोषोत्थितान् रोगान् योनिदोषोत्थितान् गदान् १३४
निहन्यादाशु तान् सर्वान् दुर्वारानप्यसंशयम् ।
एतन्निष्परिहारं च पानभोजनमैथुने ॥ १३५ ॥
सन्तताभ्यासयोगेन वलीपलितनाशनम् ॥ ३ ॥
हरीतकीशिग्रुकरञ्जभास्वत्पुनर्नवासैन्धवमिश्रमूत्रैः ।
पिष्टैः प्रशस्तः पिटकासु लेपो ग्रन्थ्यामपच्यामथ विद्रधौ च॥
पाकोन्मुखानि बृहतीकुसुमोद्भवानि
सूत्रावृतानि सुकरीषपुटे निधाय ।
दग्ध्वा कुकूलदहनेन च तानि हन्यु-
र्मेदोविकारजनितानचिरेण कोठान् ॥ १३७ ॥
गुडगृहधूमचूर्णसमुदायविलेपमिदं
कफपवनोद्भवग्रथितशोफरुजाबहुलम् ।
व्रणमथ हन्त्यनवं जनयेत् सुखमाशुतरं
त्रुटिघृतलेपनं च विपरीतगुणं त्रिदिनात् ॥ १३८ ॥

परिणतसूरणकन्दं सनागरं तोयसंपिष्टम् ।
मेदोग्रन्थिहरार्थं लिम्पेद्गहुशश्च सप्ताहम् ॥ १३९ ॥
स्वरसेन काकमाच्याः पिष्टा शुण्ठी जयेत् कोठान् ।
मुनितरुदलरसपिष्टा सा च करीषस्य वा स्वरसे ॥ १४० ॥
तैलेन कंसे संघृष्टं कृष्णतण्डुलकण्डनम् ।
लेपादुत्पित्सुमनिलाद्ग्रन्थिमन्तर्दधेद्ध्रुवम् ॥ १४१ ॥

इति श्रीवैद्यकालिदासविरचितायां वैद्यमनोरमायामक्षिकर्णव्रणग्रन्थिचिकित्साधिकारो नाम षोडशः पटलः ।

अपच्यर्बुदचिकित्साधिकारो नाम सप्तदशः पटलः ।

अपच्यर्बुदयोः पूर्वं रक्तं हृत्वा जलौकसा ।
शरपुङ्खाशिफां लिम्पेज्ज्येष्ठाम्भोभिः सुपेषिताम् ॥ १ ॥
बिम्बाशलाकां तत्पत्रस्वरसेन सुपेषिताम् ।
कंसद्वयेन संघृष्टां गतिनाशाय योजयेत् ॥ २ ॥
ताम्बूलघ्राण(?)मरिचवचाधात्रीरसोनकैः ।
दुग्धे क्षीरिशिफातुल्यैः सिद्धं तैलं गतिप्रणुत् ॥ ३ ॥
अजापुरीषवल्मीकमृदश्वत्थजलैः कृतः ।
प्रलेपः पातयत्याशु चर्मकीलं दशाहतः ॥ ४ ॥
अजापुरीषवल्मीके फल्गुपुष्पोद्भवस्तथा ।
विकसैकं क्षिपेच्चर्मकीलनुत् शूलरूपकः (?) ॥ ५ ॥
लोष्टमध्ये वृत्तरन्ध्रं कर्णे कमलतन्तुना ।
बद्धं हरेद्राविलका(?)मथवा कर्णकर्णिकाम् ॥ ६ ॥
वारिमज्जनमृतस्य विग्रहं तिन्तिणीदलरसेन सेचितम् ।
आतपे धृतमथास्य चेन्द्रियेष्वाशु जीवितमवाप्नुयाद्ध्रुवम् ॥ ७ ॥

कृष्णाष्टमीनिशायां पङ्कजमूलात्तमृत्तिकान्तःस्थम् ।
कन्दं तमसि सुपिष्टं निद्रां कुरुतेऽञ्जनात् सायम् ॥ ८ ॥
महान्धकारं संस्मृत्य यः शेते भुवि मानवः ।
कुम्भकर्णोऽपि तस्याशु भ्रष्टांगुलिरभूद्ध्रुवम् ॥ ९ ॥
निद्रां करोत्यनिद्राणां प्रदोषे शिरसा धृता ।
उपोदिका कपोतायाः शिफा वाऽथ धृता तथा ॥ १० ॥
हरितालवचाकुष्ठचूर्णं पीतवटच्छदम् ।
अद्भिः पिष्ट्वा मुखे लिम्पेद्व्यङ्गलोपनलोलुपः ॥ ११ ॥
आजेन पयसा पिष्टामारण्यतुलसीशिफाम् ।
आलिप्योद्वर्तयेद्वक्त्रं व्यङ्गलोपमना नरः ॥ १२ ॥
तैलं कषाये मुण्डिन्याः तत्कल्कं साधितं नसि ।
दत्तं पीतं च कुचयोः पतनं विनिवर्तयेत् ॥ १३ ॥
सिद्धेन तिलजेनाक्ता स्वरसे जातिलम्बयोः ।
धृता योनिमुखे वर्तिर्नष्टावृद्धर्धयेत् कुचौ ॥ १४ ॥
उद्धृत्यार्कक्षीरसेकं प्रकुर्यात् पादे विद्धं कण्टकं कण्टकेन ।
रात्रौ कन्यामग्नितप्तां घृताक्तां बध्नीयाद्राक्स्वास्थ्यमिच्छन्मनुष्यः
तदनु कण्टकवेधसमुद्भवां विकृतिमाशु निहन्ति निशाग्रतः ।
तपनतप्ततिलोद्भवबिन्दुना लवणमामयदेशसमर्पितम् ॥ १६ ॥
अङ्कोलजातानि बीजानि पिष्ट्वा यः काकमाचीरसेनैव लिम्पेत् ।
कण्डूतिमिच्छन् विजेतुं मनुष्यस्तां चापि जित्वा सुवर्णं लभेत १७
तिलसंभवसंमिश्रा पर्णमषी कुमुदचिञ्चजम्बूनाम् ।
एकैकमग्निजनितं व्रणमचिरेणैव नाशयति ॥ १८ ॥
निष्पावस्य च रागो महिषीक्षीरस्य तिमिरसंकाशम् ।
व्रणमाशुशुक्षणिभवं रोपयति विदूरकिरणाच (?) ॥ १९ ॥

इति श्रीवैद्यकालिदासविरचितायां वैद्यमनोरमायामपथ्यर्बुदचिकित्साधिकारो नाम सप्तदशः पटलः ।

अथ गुह्यरोगचिकित्साधिकारो नामाष्टादशः पटलः ।

वृषणभवशोफशान्त्यै बृहतीपुष्पोद्भवस्वेदम् ।
कृत्वा विस्राव्य जलं तिलकल्कं घृतयुतं लिम्पेत् ॥ १ ॥
लिप्तं साज्यं वराभस्म लिङ्गलूतविनाशनम् ।
करवीरस्य मूलं वा लिप्तमाज्येन कल्कितम् ॥ २ ॥
कार्पासस्यास्थिभिः पिष्टैः साधितं तिलसंभवम् ।
लिङ्गलूताविकाराणां प्रतीकारो विलेपनात् ॥ ३ ॥
सेव्याब्देन्दीवराम्भोजफलविश्वौषधैः शृतम् ।
तैलं योनर्हरेत्तांस्तान् रोगान् कामुकगर्जितान् ॥ ४ ॥
तैलं प्रियङ्गुजातीपुष्पैः सिद्धं स्मरालये लिम्पेत् ।
तेन विनिवृत्तगर्भदोषं सुभगं भगं भवेत्सद्यः ॥ ५ ॥
क्षौद्रेण पौष्करं रेणुमेकविंशतिवासरान् ।
लिहेच देहदौर्गन्ध्यं नश्येन्निःशेषमङ्गिनाम् ॥ ६ ॥
द्विनिशातिलरुग्राजीकल्कोद्वर्तितविग्रहः ।
यः स्नाति तस्य देहः स्यात् सुगन्धिर्भास्करच्छविः ॥ ७ ॥
तण्डुलकण्डनलुलितैर्लशुनवरासर्षपैः कृतो धूपः ।
कन्दर्पराजधान्यास्तोदं द्रागेव जयति रमणीनाम् ॥ ८ ॥
तप्ते द्विनिष्कभुजगे पारदनिष्कं निधाय संमिलितम् ।
पिष्टं क्षौद्रेण जयेद्योनिफलं लिप्तमर्बुदार्दीश्च ॥ ९ ॥
लोध्रामलकहरिद्राहरीतकीखदिरसारसंभूतः ।
क्वाथः शौचेन रवेर्वारे स्याद्योनिरोगहरः ॥ १० ॥
ब्रह्मदण्डीदलैः क्षौद्रसहितैः स्मरमन्दिरम् ।
लिप्तमत्यन्तिकं नृणां स्नेहमावहयेद्रतौ ॥ ११ ॥
भूमिकदम्बस्वरसः सक्षौद्रः शर्करासमायुक्तः ।
योनौ नाभ्यां लिप्तः मियमचिराद्दासवत् कुरुते ॥ १२ ॥

मालतीपुष्पसंसिद्धतैलाभ्यक्तवराङ्गया ।
किङ्करीक्रियते नार्या संभोगसमये पतिः ॥ १३ ॥
रोचनालक्ष्मणामूलकल्कलिप्ततनुर्वधूः ।
रतौ प्राप्नोति सौभाग्यं दयितप्रियतामपि ॥ १४ ॥
निधाय सार्तवे योनौ रुग्यष्टी दिवसत्रयम् ।
ततः स्वमूत्रैः संपिष्य वश्यायान्नादिषु क्षिपेत् ॥ १५ ॥
चूर्णेनाञ्जनमलयजसरसिजदलरोचनाप्रियङ्गनाम् ।
अञ्जितदृष्टिस्तरुणीं यां पश्येत् सा भवेद्वश्या ॥ १६ ॥
यैः कैश्चिद्रक्तकुसुमैः पञ्चभिः सप्रियङ्गुभिः ।
लिप्तलिङ्गो वशे कुर्यान्नारीं सौभाग्यगर्विताम् ॥ १७ ॥
पारावतस्य शकृता मधुना सैन्धवेन च ।
आलिप्तसाधनः कान्तां स्ववश्यां कुरुते रतौ ॥ १८ ॥
तुरङ्गगन्धमञ्जिष्ठापत्रजातीप्रसूनकैः ।
मकरध्वज एव स्यात् समालिप्तनिजध्वजः ॥ १९ ॥
मण्डूकपर्णीरससमूर्च्छितं तु लिप्तं ध्वजे पारदमातनोति ।
ध्वजोद्धतिं योनिनिवेशमात्रे रामामनःप्रीणनमोहनं च ॥ २० ॥
शुक्तं रसं पारदशर्कराभ्यां स्नुवः कदम्बस्य विलेप्य लिङ्गे ।
रतेन नारीं स्ववशां करोति नारी च यान्यं नरमिच्छतीह ॥२१॥
मुखभवजलयुक्तं भूमिसर्पोत्थितं य-
न्मसृणतरसुचूर्णं पिच्छनाले स्थितं तत् ।
सुरतिसमयकाले नाभियुक्तं निरुन्ध्या-
द्विविधमधुररागैः प्रेरितं चाशु बीजम् ॥ २२ ॥
सितेषुपुङ्खिकामूलं केवलं वदने धृतम् ।
तुषाम्बुपिष्टं लिप्तं च शुक्रं संस्तम्भयेद्रतौ ॥ २३ ॥
मधुपिष्टैर्ध्वजलेपो राजतरुमरिचकपित्थवटविनिर्यासैः ।
रम्भाफलाम्बुकलितैर्वेदयेच्च द्रावयेच्च वनितां वै ॥ २४ ॥

पारदसितेषुपुङ्खामूलाभ्यां नक्तमालफलकाभ्याम् ।
वदनगताभ्यां बीजं भवति नृणां स्तम्भितं दीर्घम् ॥२५॥
नील्या दीर्घेण पत्रेण वक्त्रगेण निरुध्यते ।
रेतः श्वेतस्य मूलेन नाभिलिप्तेन वा चिरम् ॥ २६ ॥
सितवायसजङ्घाया मूलं मध्वब्जकेसरम् ।
पिष्टानि नाभिलिप्तानि रेतःस्तम्भं वितन्वते ॥ २७ ॥
दुस्पर्शोपणकुष्ठजीरकवला दग्ध्वा पुटे वारिणा
पिष्ट्वा कोलमितां सुगुटिकां कृत्वाऽथ तां शोषयेत् ।
नाभौ सा मधुकल्किता विनिहिता रत्युत्सवाडम्बर-
प्रारम्भेष्ववसानकालविकलं कुर्यान्नरं निश्चितम् ॥२८॥

इति श्रीवैद्यकालिदासविरचितायां वैद्यमनोरमायां गुह्यरोगचिकित्साधिकारो नामाष्टादशः पटलः ।

अथ विषचिकित्साधिकारो नामैकोनविंशतितमः पटलः ।

दूतमुखोत्थितवर्णान् द्विगुणीकृत्य त्रिभिर्हरेद्भागम् ।
एकद्वयेन जीवेद्दष्टो म्रियतेऽथ शून्येन ॥ १ ॥
चन्द्रमार्गगतो वायुर्दूतस्तन्मुखमागतः ।
तदा जानीहि दष्टस्य जीवितं मृतिरन्यथा ॥ २ ॥
अग्निनिर्ऋतिदिक्स्थः पृच्छति दूतो भुजङ्गदष्टस्य ।
अन्तकनिवासवासः प्रत्यासन्नो भवेत्तस्य ॥ ३ ॥
विद्धि महादिशि दूते स्थितवति दर्वीकरेण दष्ट इति ।
विदिशि तु मण्डलिनाऽदंशि दिशोर्मध्ये तु राजिलेनैव ॥४॥
पृष्टा यदि वामाङ्गे स्थितः स्त्रिया दष्टकं तमवगच्छेत् ।
अन्यतरेण तु पुंसा द्वितयेन नपुंसकेन सर्पेण ॥ ५ ॥
दूतस्य मन्त्रिणो वा वहेदिडापिङ्गलाद्वयं वायुः ।
स्त्रीपुन्नपुंसकैस्तैः क्रमेण दष्टं विजानीयात् ॥ ६ ॥

जीर्णदेवकुलवृक्षकोटरे वंशमूलमृतकाननेऽह्यः ।
ये वसन्ति विविधा हि गह्वरे ते भवन्ति जनमृत्युकारणम् ७
सिन्धुसङ्गतिषु पादपे विले द्वीपकूपकुलिशेषु शिग्रुषु ।
वेत्रपत्रगहने चतुष्पथे व्यापदे भवति पन्नगो दशन् ॥ ८ ॥
गुलिकस्योदयकाले(?)यो यो वारेषु मन्त्रिभिः कथितः ।
तस्मिन् फणिदष्टस्य प्रतिकारविधिर्न भवेज्जातु ॥ ९ ॥
पूर्वस्मिन् दक्षिणे वामे पृष्ठे स्ववपुषः क्रमात् ।
भागे दंशन्ति भुजगा द्विजात्याद्यन्वयोद्भवाः ॥ १० ॥
एकोऽथवा त्रयो वा दंशा बहुवेदनाः स्रवद्रुधिराः ।
काकाङ्घ्रिचक्रकूर्माकाराश्च नयन्ति यमसदनम् ॥ ११ ॥
भ्रूमध्ये त्रिकवक्षस्तनोष्ठतालुहृदयनाभिगले ।
शङ्खयुगचिबुककुक्षिस्कन्धशिरस्तालुमूलफलगुदेषु ॥ १२ ॥
कक्षे सन्धिषु नृणां स्याद्यदि दंशा भुजङ्गदशनकृताः ।
तमसाध्यविषं प्राहुर्मन्त्रध्यानौषधादीनाम् ॥ १३ ॥
नखेष्वधरयोर्हस्ततलयोरपि नीलिमा ।
दृश्यते यत्र तन्मन्त्री मृतमेवाध्यवस्यतु ॥ १४ ॥
देहेऽप्यसाधनस्पर्शे कृतेऽप्यङ्गं न कम्पते ।
यस्य जीवयितुं तं न प्रभवेदपि पक्षिराट् ॥ १५ ॥
प्रतिमां स्वामादर्शे सलिले वा नावलोकेत ।
घ्राणाग्रं भ्रूमध्यं दष्टो यः स क्षणान्म्रियते ॥ १६ ॥
नखाग्रभागेषु नखान्तरे वा प्रपीडनं वेत्ति न योऽहिदष्टः ।
यो हस्तरुद्धश्रुतियुग्मरन्ध्रो नादं नितान्तं शृणुयान्महान्तम् १७
ज्वलनदीपशिखेन्दुदिवाकरान् यदि न पश्यति भोगिविषार्दितः।
स्वकरमूर्धजसंचयलुञ्चनः स च यमालयमाविशति ध्रुवम्॥१८॥
स्वरैः षोडशभिर्जसं (?) वायन्तर्यदि गच्छति ।
दष्टस्य यस्य तस्य स्याज्जीवितं मृतिरन्यथा ॥ १९ ॥

दंशस्योपरि सहसा ज्वलनं चतुरङ्गुले प्रयुञ्जीत ।
तस्याचूषणमथवा प्रोतान्तरितस्य विदधीत ॥ २० ॥
विषं जयेत् स्थावरजङ्गमानां छर्द्या विरेकेण च शोधितस्य ।
नस्याञ्जनालेपनपानयोगैः सेव्यादिना रात्रियुगादिना च॥२१॥
दन्ताद्घ्राणादक्ष्णोर्देहाद्वा दंशदेशमात्रेण ।
लिम्पेन्मलेन च ततो नातिक्रामेद्विषं दंशात् ॥ २२ ॥
आस्याम्बुसमुपेतेन मलेन श्रोत्रजन्मना ।
सद्यो लेपाद्विषं दंशान्नातिक्रामति जातुचित् ॥ २३ ॥
कृतव्रणे नखाग्रेण दंशे दन्तमुखेन वा ।
विशाखां मर्दयेत् सर्वविषघ्नामथ भक्षयेत् ॥ २४ ॥
सद्यो लोहादिभिस्तप्तैर्ज्वलनज्वालयाऽथवा ।
दंशप्रदेशे दष्टस्य दाहो विषविकारजित् ॥ २५ ॥
क्षां क्षीं क्षुं क्षैः क्षौः क्षः संजप्त्वा वारिभिर्मुहुः सेकात् ।
दष्टमनुष्यस्य स्यान्निर्विषता तु क्षणेनैव ॥ २६ ॥
ओं सुवर्णरेखे कुक्कुटविहगरूपि स्वाहा ।
विद्यात् सुवर्णरेखेयमेतज्जप्तेन वारिणा ॥ २७ ॥
दष्टस्याङ्गसमासेकः कृतः स्याद्विषवेगजित् ।
वामहस्ते स्वरैश्चन्द्रमण्डलेन च वेष्टितम् ॥ २८ ॥
ध्यायेच्छङ्करममलं स्रवन्तममृतं मुहुः ।
तेन हस्तेन संस्पृष्टं भस्मवार्यौषधादिकम् ॥ २९ ॥
विकीर्णं द्रागपाकुर्याद्विषरोगग्रहादिकान् ॥ ३ ॥
न्यस्य वकारं शीर्षे वर्षन्तं श्वेतममृतधाराभिः ।
स्नपयन्तं सकलतनुं संपूर्णं शशधरं पुनर्हृदये ॥ ३० ॥
चिन्तयति पूर्णमेवं विषणिर्नाशं समुपयाति ।
क्षणमात्रादपि लोके भूतग्रहडाकिनीदोषाः ॥ ३१ ॥
लवणार्धपलोपेतशिश्वापल्लवजो रसः ।

कुडवप्रमितः पीतो विषं हन्ति फणाभृताम् ॥ ३२ ॥
अश्मैर्हिङ्गूपेतैः सुरदाल्याघूर्णितैः शकलैः ।
दत्तं नस्यं त्रिदिनात् सर्पविषध्वान्तमार्तण्डः ॥ ३३ ॥
अपनयति घातकहस्तः परिभावितो बहून् वारान् ।
फणिवल्लीदलसलिलैः सकलं गरलं न सन्देहः ॥ ३४ ॥
तदहर्जवत्सशकृता तगरेणापि प्रवर्तिता वर्तिः ।
नृजलेन कल्किता स्यादिपहृन्नस्यादिषु विकीर्णा ॥ ३५ ॥
व्योपनवनीतदधिमधुसिन्धूत्थमधूकवृक्षसाराणाम् ।
उपयोगाद्वासुकिना दष्टोऽपि भवेत् क्षणादविषः ॥ ३६ ॥
भूनागं मरिचं हिङ्गु लवणं केसरास्थि च ।
नृजलेनैव नस्याद्यैः सर्पादिविषनाशनम् ॥ ३७ ॥
काकमाचीरसेनैव रसोनमरिचौ भिषक् ।
पिष्ट्वा नस्याञ्जनालेपैरहेर्विषमपोहति ॥ ३८ ॥
आस्फोतमूलं विधेन श्वेतार्कक्षीरभावितम् ।
नृजले नस्ययोगेन बोधयेद्देहिनं मृतम् ॥ ३९ ॥
अग्निमन्थमधूकसारहरितमञ्जरीमूलरु-
जाणिमन्थमथाशु गोपयसा विलिप्य तमापिबे- ।
न्नासिकाङ्क्रिकाटिकाहृदयोरुचूतपालिकान् (?)
बिन्दुषट्कबिडालमूषिकजं विषं विनिवारयेत् ॥ ४० ॥
संचूर्ण्य वस्त्रबद्धं केसरपुष्पं च त्रिकटुं च ।
वृश्चिकविद्धे देशे तिलजयुतं स्वेदितं जयेत्तोदम् ॥ ४१ ॥
दिवसकरदुग्धतुल्यं तीक्ष्णतरचूर्णमाशु संलिप्तम् ।
घनरव इव नागकुलं वृश्चिकविषमाशु नाशयति ॥ ४२ ॥
हरति वृश्चिकजं विषमञ्जसा लवणनागबलान्वितलेपनम् ।
मदनमाशु यथा रतिवल्लभं हरललाटदृगुत्थितपावकः ॥ ४३॥

ताम्बूलं गोमयोपेतं भक्षयेद्वृश्चिकातुरः ।
सहसैव तु तद्व्याधिर्नाशं याति न संशयः ॥ ४४ ॥
विशुद्धवारनक्षत्रे गृहीता काश्मरीशिफा ।
दूर्वासहस्रं तत्स्पर्शो दंशं वृश्चिकजं जयेत् ॥ ४५ ॥
शीता वृश्चिकविद्धस्य स्विद्यते कम्पते तनुः ।
आतपं वाञ्छति सदा रेतश्च स्रवति क्षणात् ॥ ४६ ॥
निर्गुण्ड्यर्कदलैः क्षुण्णैः सकरीषैर्विपाचितैः ।
ऊष्मस्वेदो हितस्तस्य वचालवणनागरैः ॥ ४७ ॥
साहिगन्धैः सतक्रैश्च सुपिष्टैः स्वेदयेत् पुनः ।
तान् पाययेद्भिषक् तं च मर्दयेत् कोष्णभस्मना ॥ ४८ ॥
सुखीभवेद्विषघ्नैश्च भोजनैस्त्रिदिनान्तरम् ॥ ४९ ॥
उपानत्प्रहारो मयूरप्रलेपो विषं हन्त्यलर्कोद्भवं सद्य एव ।
तथा सर्पिषा चाशु कोष्णेन सेकस्त्वलर्कारिपत्रोपनाहश्च रात्रौ॥
घननादशिफा पिष्टा पीता तण्डुलवारिणा ।
प्रणाशयेद्घृतोपेता निखिलं कृत्रिमं विषम् ॥ ५० ॥
वराग्गृढकृतः स्वेदो दंशे श्वविषनाशनः ॥ [illegible] ॥
आढकार्धवसुभागपेषितं नालिकेरफलवल्कलोदकम् ।
आखुसंभवविषं विनाशयेच्चिन्तिणीकमिव साम्लकाञ्जिकम् ५१
अलर्कस्वरसं प्रातस्तैलयुक्तं दिनत्रयम् ।
यः पिबेन्मौषिकी बाधा तस्य जन्मान्तरेऽपि न ॥ ५२ ॥
बहलं प्रलिप्य सर्पिः क्षणमभितः सपदि दष्टवत्याखौ ।
मार्जारेण त्रिदिनं त्रिसन्ध्यमवलेहयेन्मतिमान् ॥ ५३ ॥
प्रलेपः स्यात्तु वातारिशाल्मलीकथितैर्जलैः ।
गैरिकद्विनिशाभिर्वा नखदन्तविषे हितः ॥ ५४ ॥
रक्तपुच्छफलालिकानिशितित्रिणीसहितोदन-
स्पर्शमापदमाशुनिर्विषमं भवेदथवाक्षतम् (?) ।

भुक्तवानथ ऊर्ध्वमप्यतिसार्यते हतसंज्ञक-
स्तं भिषग्घननादवारिजलेपनैः परिपालयेत् ॥ ५५॥
लीढः क्षौद्रसितायुक्तश्चूर्णस्ताम्रसुवर्णयोः ।
स्यात् स्थावरविषध्वान्तसन्तानैकदिवाकरः ॥ ५६ ॥
तिलमद्यदिवास्वप्नव्यायामातपमैथुनम् ।
कोपं तैलं कुलत्थांश्च विषार्तो वर्जयेत्सदा ॥ ५७ ॥

इति श्रीवैद्यकालिदासविरचितायां वैद्यमनोरमायां विषचिकित्साधिकारो नामैकोनविंशतितमः पटलः ।

अथ रसायनवाजीकरणाधिकारो नाम विंशतितमः पटलः ।

मम सत्यप्रतिज्ञेयं यूयं शृणुत पण्डिताः ।
पथ्यायाः सदृशं किञ्चित् कुत्रचिन्नैव विद्यते ॥ १ ॥
पथ्याशी व्यायामी स्त्रीषु जितात्मा नरो न रोगी स्यात् ।
यदि मनसा वचसा वा द्रुह्यति नित्यं न भूतेभ्यः ॥ २ ॥
त्रिफलाभोजिनः पुंसः पथ्यान्नमितभोजिनः ।
रोगा भवन्ति निर्वीर्या विप्रा इव निराग्नयः ॥ ३ ॥
छेदं च शाल्मलितरौ रन्ध्रे संस्थाप्य जीवतः ।
आदाय भक्षयेत् पथ्यां क्षीराशी विजरो भवेत् ॥ ४ ॥
आमलकीफलचूर्णं क्षौद्रेणाज्येन वा सायम् ।
लीढं नासादृक्श्रुतियौवनबुध्यग्निसंजननम् ॥ ५ ॥
चूर्णं धात्र्यभयाक्षाणां नील्यीं वा नलदानपि ।
लीढ्वा कालेषु नीरोगी हविर्गुडमधुक्रमात् ॥ ६ ॥
पथ्याधात्रीमुस्तकविडङ्गलोहाग्नयः क्रमाद्वृद्धाः ।
चूर्णीभूता लीढाः क्षौद्रेण समस्तरोगहराः ॥ ७ ॥
प्रातःकाले धात्रीं भुक्त्वा पथ्यां रात्रौ चाक्षं नित्यम् ।
खादन् सर्वान् व्याधीन् जित्वा जीवेत्सूर्यो यावच्चेन्दुः ॥ ८ ॥

लौहे पात्रे लिप्तां पथ्यां लीढ्वाऽन्येद्युः सर्पिःक्षौद्रम् ।
व्याधीन् जित्वा स्थायीकुर्यान्नित्यं देहं निःसन्देहम् ॥ ९ ॥
माधवमधुगुडसैन्धवसितोपलानागरैः पृथक् पथ्या ।
शिशिरादिष्वभ्यस्ता व्याधिचयं विजयते नृणाम् ॥ १० ॥
कुष्ठचूर्णं समध्वाज्यं प्रत्यूषे प्रपिबेन्नरः ।
सुगन्धसुन्दरवपुश्चिरं जीवेदनामयः ॥ ११ ॥
मुस्ताहपुषयोश्चूर्णं पयसा सह यः पिबेत् ।
सघृतं तस्य देहः स्यात्सुखभावमनोहरः ॥ १२ ॥
पथ्याशुण्ठ्योश्च यच्चूर्णं प्रभाते मधुसर्पिषा ।
लीढं रसायनं श्रेष्ठं बलीपलितनाशनम् ॥ १३ ॥
शुण्ठीसितोपलासिन्धुगुडक्षौद्रकणायुता ।
हिमादिषु पृथक् पथ्या सेविता स्याद्रसायनी ॥ १४ ॥
तिलधात्रीफलचूर्णं समधुघृतं प्रतिदिनं प्रगे लीढम् ।
जनयेन्मासेन मतिं महतीं हन्याज्जरां च पराम् ॥ १५ ॥
प्रातः प्रातर्नसा पीतं वारि हन्ति जरागमम् ।
कासं श्वासं बलिं व्यङ्गं पालित्यं तिमिरं तथा ॥ १६ ॥
उदकं शाल्मलीमूलाद्व्रणिताद्गलितं घटे ।
शोषितं सतिलं खादेत् केवलं वा वृषायते ॥ १७ ॥
स्वप्याद्वामेन पार्श्वेन रात्रौ वाञ्छन् सुखायुषी ।
उत्तिष्ठेत्तु ततः प्रातः शयनाद्दक्षिणेन च ॥ १८ ॥
पिप्पलस्य शृतं मूलफलपल्लववल्कलैः ।
क्षीरं घृतसितोपेतं पीतं रेतोविवर्धनम् ॥ १९ ॥
श्वेतगिरिकर्णिकायाः पत्रं पयसा विपक्वमश्नीयात् ।
प्रातर्नरोऽङ्गनानां शतमपि गच्छेदपूर्ववद्रात्रौ ॥ २० ॥
माषाक्षताश्वगन्धातिलमुसलीनां क्रमेण भागाः स्युः ।
सप्त नवैकैकं द्वे सर्पिषः पाचिताः परं वृष्याः ॥ २१ ॥

दशगुणदुग्धे सिद्धं शतावरीरसे घृतं प्राश्नन् ।
मधुमागधिकासहितं सशर्करं भवति रतिमल्लः ॥ २२ ॥
कुम्भे निधाय शकलीकृतमूरुपूगं
तत्रैव शाल्मलिजटागलितोदकेन ।
संभावितं दिनमुखे च रतौ च खादन्
वृद्धो भवेत् सुरतनाटकचक्रवर्ती ॥ २३ ॥'
अधुना [1]शिवपादसेवकेन पृथगेषा सकलागमार्थरूपा ।
रचिता भिषजां मनोरमा जनुषां रोगसमाप्तये समाप्ता ॥ २४ ॥

इति श्रीवैद्यकालिदासविरचितायां समस्तायुर्वेदार्थरूपायां वैद्यमनोरमायां रसायनवाजीकरणाधिकारो नाम विंशतितमः पटलः ॥

इति वैद्यमनोरमा समाप्ता ।

---

१ 'शिवपादशेखरेण' इति पाठान्तरम् ।

आयुर्वेदीयग्रन्थमाला ।

धाराकल्पः ।

मङ्गलाचरणम् ।

अनन्त[1]कल्याणगुणैकभाजनं निरन्तरानन्दचिदेकविग्रहम् ।
अनन्तरायेप्सितसिद्धये वयं तमेक[2]दन्तं सततं भजामहे ॥ १ ॥

स्नेहधारागुणाः ।

धातूनां दृढतां करोति वृषतां देहाग्निवर्णौजसां
स्थैर्यं पाटवमिन्द्रियस्य जरसो मान्द्यं चिरञ्जीवितम् ।
अस्रां भङ्गमपाकरोति नितरां दोषान् समीरादिकान्
सर्वस्नेहकृता सुखोष्णसुभगा सर्वाङ्गधारा नृणाम् ॥ २ ॥

सेचनविधौ द्रोणीकरणयोग्या वृक्षाः ।

प्लक्षोदुम्बर[3]गन्धसारवरुणन्यग्रोधदेवद्रुमाः
पुन्नागाढकपित्थचोचबकुलाशोकासनाम्रास्तथा ।
डोलाचम्पकबिल्वनिम्बखदिरामोघाग्निमन्थार्जुना
इत्याद्यन्यतमेन सेचनविधौ द्रोणीं प्रकुर्याद्बुधः ॥ ३ ॥

द्रोणीप्रमाणम् ।

द्रोणी हस्तचतुष्कदीर्घकरमात्रव्यासतत्पादमा-
त्रोच्चद्भित्तियुता दृढा समतला पादान्तरन्ध्रा बहिः ।
शीर्षस्थान इहोन्नतैककरमात्रोत्तानविस्तारका
निम्ना किञ्चन मध्यतश्च चरणैर्हस्तैश्च युक्ता दृढैः ॥ ४ ॥

---

१ 'कल्याणं मङ्गलं शुभम्' इत्यमरः । २ 'अप्येकदन्तहेरम्बलम्बोदरगजाननाः' इत्यमरः । ३ गन्धसारश्चन्दनः । 'गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्' इत्यमरः ।

धारासेचनविधिः ।

एवं मारुतहारिभिश्च तरुभिर्द्रोणीं विधायादरा-
देवं चेभमुखं द्विजानपि भिषग्वृद्धान् प्रपूज्यातिथीन् ।
पूर्वाह्णे दिवसे शुभेऽतिमहिते लग्ने शयानस्य त-
द्द्रोण्यां सेचनमाचरेत् पटुमतिर्द्रव्यैर्यथोक्तैर्भिषक् ॥ ५ ॥

सेचनार्थं कलशविधानम् ।

स्वर्णाद्युत्तमलोहजस्तु करको मृत्संभवो वाऽत्र त-
न्नालाग्रं तु कनिष्ठिकाङ्गुलिपरीणाहोन्मितं रोगिणः ।
द्विप्रस्थप्रमितो विधेय इति, वा मध्यस्थरन्ध्रादधो
गच्छद्धारिरथोर्ध्वलम्ब्यपि घटः कार्यः शिरःसेचने ॥६॥

सेचनविधौ योग्याः परिचारकाः सेचनविधिश्च ।

ग्राह्यास्ते परिचारकाः स्युरनुरक्ताः सावधानाः शुभा
ये, तद्धस्तदृढावलम्बनवशाच्चत्पात्रपातादितः ।
भीतिर्जातुचिदातुरस्य तु यथा न स्यात्तथा कारये-
द्धारां मूर्धनि हस्तयोरपि पृथग्वक्षःस्थले पादयोः ॥ ७॥
यद्वा हस्ततलप्रपूर्णपिचुना सेकं क्वचित्कारये-

दोषविशेषे योज्याः स्नेहाः ।

द्योज्यं स्नेहचतुष्टयं च तिलजं वा तत्र शुद्धेऽनिले ।
पित्तेऽस्रे च घृतं, कफे तु तिलजं, वातेऽस्रपित्तान्विते
तैलाज्यं तु समं, कफेन सहिते तैलार्धभागं घृतम् ॥८॥

अथ तक्रधारां विवक्षुः पूर्वं चतुर्धा मूर्धनि तैलं निर्दिशति—

अभ्यङ्गः परिषेचनं पिचुशिरोवस्ती च विद्याच्चतु-
र्भेदं मूर्धनि तैलमप्यतिगुणं चैतत्क्रमेणोत्तरम् ।

---

१ 'इभमुखं' गजाननम् । २ करकः कमण्डलुः । 'करकस्तु पुमान् पक्षिविशेषे दाडिमेऽपि च । द्वयोर्मेघे जले न स्त्री करकश्च कमण्डलौ ।' इति मेदिनी । ३ 'सर्पिर्मज्जा वसा तैलं स्नेहेषु प्रवरं मतम्' इति वाग्भटः ।

अभ्यङ्गो विनिहन्ति रौक्ष्यमपि कण्डूं, दाहशोफव्रण-
क्लेदादीन् परिषेचनं, पिचु कचस्फोटादि, चान्त्योऽनिलम् ॥

तक्रधाराविधानम् ।

धारायास्त्वेकवर्षातपहिमपरिशोषातिशुद्धप्रकीर्णं
धात्रीप्रस्थं सपादं भिषगथ पटुधीः संत्यजेद्बीजमस्याः ।
उत्क्वाथ्याष्टादशाख्यामितकुडुबजले षष्ठभागावशिष्टं
तत्तुल्यं चाऽम्लतक्रं विधिरिति मुनिभिः प्रोक्त आत्रेयमुख्यैः

धारायोग्यपात्राणि ।

धारायां स्फटिकप्रवर्णरजतप्लक्षादिपूर्वोक्तद्रु-
क्षायस्ताम्रवराटिकाप्रथितमृत्पात्रं त्वतीवोत्तमम् ।
केचिद्रोगिकनिष्ठिकान्तविवरं शंसन्ति केचित्तु वा
तत्पर्वोपमविस्तृतं तु सुषिरं पात्रस्य मध्ये कृतम् ॥११॥

सेचनविधेः पश्चात्कर्म ।

धारायाश्चावसाने निजगदशमनप्रोक्तसर्पिश्च सेव्यं
तत्काले चावसंस्थः कथमपि वसतु प्रीतिमानेष रोगी ।
कायक्लेशानशेषान्मनसि सुखहरान्वक्रजिह्वासुखादीं-
स्त्यक्त्वा पाटीरशुद्धाम्बरविधृतवपुर्ब्रह्मविज्ञानितुल्यः ॥१२॥

तक्रधारासेचनगुणाः ।

केशादीनां च शौक्ल्यं क्रममपि तनुतां दोषकोपं शिरोरु-
ग्बाधामोजःक्षयं तत्करचरणपरिस्तोदनं मूत्रदोषम् ।
सन्धीनां विश्लथत्वं हृदयरुगरुची जाठराग्नेश्च मान्द्यं
धात्रीतक्रोत्थधारा हरति शिरसिजान् कर्णनेत्रामयौघम् १३

घृततैलधारासेचनगुणाः ।

स्थैर्यं वाङ्मनसोः शरीरबलमप्याहारकाङ्क्षा धृति-
र्माधुर्यं वचसस्त्वचोऽपि मृदुता नेत्रे प्रकाशोऽगदः ।

---

१ 'द्विगुणिते वारिणि शतांशक्षीराज्जातं तक्रं' इति क्रमः केरलेषु ।

शुक्रासृक्परिपोषणं रतरतिर्दीर्घायुरल्पोष्णता
सुस्वप्नं घृततैलसेचनगुणेनाऽस्तीह जाग्रत्सुखम् ॥ १४ ॥

अथ स्नेहस्वेदः ।

तत्तद्व्याधिशमोदितौषधिगणैः सिद्धं च वा योजयेत्
स्वस्थेऽभ्यञ्जनसेचनादिषु सदा तैलाज्यसंमिश्रितम् ।
एकाहान्तरमेव वा प्रतिदिनं पूर्णे बले मध्यमे
त्यक्त्वा द्वित्रिदिनं चतुर्दिनमपोह्याप्यत्र षट् पञ्च वा १५
पित्ते कोष्णमथोष्णमेव विहितं शुद्धे समीरामये
तत्स्नेहं द्रवमात्रमेव कफयुक्ते रक्तपित्तेऽपि च ।
ऊर्ध्वाङ्गे तु सुशीतमेव विहितं सिञ्चेदविच्छिन्नमे-
वात्यर्थोच्चविलम्बितद्रुतनतं कुत्रापि नैवाचरेत् ॥ १६ ॥

सेचनकालप्रमाणम् ।

रूक्षे पित्तयुतेऽनिले च परमः कालो मुहूर्तद्वयं
सार्धं तत्र, तदर्धमात्र उदितः स्निग्धे कफोन्मिश्रिते ।
यावत्स्वेदसमुद्भवो भवति तत्तावन्निवर्तेत वा,
स्नेहोऽत्र त्रिभिरेति रोमविवरं मात्राशतैश्च क्रमात् ॥ १७
सप्तापि त्वच एति सप्तभिरथो षड्भिस्तथाऽस्रादिकान्
षड्धातूनिषुसिन्धुदिग्ग्रहमिता मात्रा मुहूर्तो भवेत् ।

सेचनविधौ धारोच्चतायाः प्रमाणम् ।

धारोच्चं चतुरङ्गुलं तु शिरसः सेके तदन्यत्र त-
त्प्रोक्तं तत्त्रिगुणं च मन्दपतनात्तद्रोगवृद्धिर्भवेत् ॥ १८ ॥

अविधिधाराकरणदोषास्तच्चिकित्सा च ।

अत्युच्चद्रुतभूरिकालपरिषेकाद्दाहवीसर्परु-
ङ्मूर्च्छाङ्गस्वरसादसन्धिदलनच्छर्दस्रपित्तज्वराः ।

---

१ केरलेषु 'मुक्किपिथिथिवित्' इति प्रथिताचरः कोऽपि परिलक्षोत्तमाङ्गचिकित्साविशेषः ।

कोठाद्याश्च भवन्त्यतः परदिने गण्डूषनस्यादिकं
कृत्वा शुद्धमहौषधेन सुशृतं तोयं पुनः पाययेत् ॥ १९ ॥
सायाह्ने लघु भोजयेत्कटुतरं यूषान्वितं वाऽप्यथो
बस्तिं स्नेहकृतं च सैन्धवकृतं कुर्यात्तृतीयेऽहनि ।
स्नेहव्यापदि चोक्तकर्म निखिलं कुर्याच्चतुर्थेऽह्नयतः
प्राग्वत्स्नेहनिषेवणं च विधिवत्कुर्याद्दिने पञ्चमे ॥ २० ॥

सेचनविधौ क्षीरादिपरिवर्तनकालः ।

एकाहादपरं च सेचनविधौ क्षीरादिकं गृह्यते
धान्याम्लं त्रिदिनात्परं विधिरयं स्नेहस्य तु प्रायशः ।
एकेन त्रिदिनं परेण च तथा सिञ्चेत्त्र्यहं तद्द्वयं
मिश्रीकृत्य च सप्तमेऽहनि पुनस्त्यक्त्वैनमेवं चरेत् ॥ २१

सेचनद्रव्याणां नूतनादिभेदेन गुणदोषाः ।

यन्नूतनेन निषेचनं प्रतिदिनं तत्तूत्तमं, मध्यमं
तेनैव त्रिदिनं, ततोऽपि च परं मिश्रीकृतं चाधमम् ।

सेचनविधानयोग्यः कालः ।

अत्युष्णेऽपि च मन्दकोपसमये मन्दातपे शीतले
कुर्यान्न त्वपराह्णकेऽपि च भिषग्रात्रौ तथा सेचनम् ॥ २२

सेचनविधेः पश्चात्कर्म ।

सेकानन्तरमातुरस्तु शिशिराम्बुप्रोक्षणैः ष्ठीवनै-
श्चोत्क्षेपैर्मृदुमारुतैरनुगुणं विश्राम्य तत्रोत्थितः ।
मन्दं किञ्चन मर्दितोऽनु च रसैः स्नेहं कषायैस्त्यजे-
त्स्नात्वा कोष्णजलैः सुगन्धसुभगो धान्यौषधाम्भः पिबेत् ॥
पेयं वा लघु सोषणाज्यकटु तक्रं यूषयुक्तं मितं
भक्तं कोष्णमथाचरेद्विधिमतः स्नेहोक्तमत्राखिलम् ।
एवं सप्तदिनं व्यतीत्य पुनरन्येद्युर्विरेकं ततो
बस्तिं तत्र तु कारयेदिति विधिर्नासत्यसंभाषितः ॥ २४ ॥

सेचनविधौ परिहारकालः ।

यावन्त्यौषधयोजितानि दिवसान्येतानि तावन्त्यहा-
न्यन्यान्यप्यथ सर्वकर्मसु बुधो नित्यं जितात्मा नयेत् ।

सेचनविधौ परिहार्याणि ।

स्त्रीणां स्पर्शनदर्शनस्मृतिवशाच्छुक्रे स्रुते सन्ति त-
त्संपर्केण विनाऽपि तद्भवगदास्तस्मात्त्यजेत्सर्वदा ॥ २५ ॥
व्यायामातपवेगरोधहिमधूमात्युच्चनीचोपधा-
नाह्नःस्वप्नरजःप्रवातचिरकालासीनताः संस्थितिम् ।
शोकं जागरपादयानगमनक्रोधातिभाष्यादिकां-
स्त्यक्त्वाऽथोष्णजलोपचार्यनतिभुक् स्याद्ब्रह्मचारी सदा॥२६

रोगविशेषे परिषेचनविधिविशेषः ।

गुल्मानाहभगन्दरव्रणतुनीशूलाभिघातास्रवा-
तोदावर्तककोठमूढमरुदष्ठीलाविसर्पादिषु ।
प्लीहाध्मानकविद्रधिप्रतितुनीष्वेकाङ्गसेकं तथा
कुर्याद्धस्ततलप्रपूर्णपिचुना मन्दं सुखोष्णं भिषक्॥२७॥

इति धाराकल्पः समाप्तः ।
